राजचूडामणिदीक्षितविरचितं

# श्रीशङ्कराभ्युदयम्

महाकाव्यम्

प्रस्तावनालेखकः
*श्री श्रे. श्रीनिवासशर्मा*, शिरोमणिः, एम्. ए.
संस्कृतविभागाध्यक्षः, अण्णामलै सर्वकलाशाला

टिप्पणकर्ता
**वैद्य शि. वे. राधाकृष्ण शास्त्री**
त्रिशिरःपुरी

प्रकाशकसंस्था
**शिमिलि श्री वेङ्कटराम शास्त्री ट्रस्ट्**

1986] [Rs. 10-00

PK3798
.R26
S750
1986

The UNIVERSITY OF CHICAGO LIBRARY
PL 480

# SRI SHANKARABHYUDAYAM

BY

SRI RAJACHUDAMANI DIKSHITA

*Foreword by*

S. SRINIVASA SARMA, Siromani, M.A.,
Annamalai University.

*Edited with notes and Published by*

*Vaidya* **S. V. Radhakrishna Sastri,**
22, Veereswaram Approach Road, Srirangam-620006

*On behalf of*

Simili Venkatarama Sastri Trust

1986] [Rs. 10-00

श्रीगुरुभ्यो नमः

# अथ किञ्चिन्निवेदये

कलये भगवत्पादशङ्करं लोकशङ्करम् ।
इतस्ततः संगृहीतैः रुचिरैः कविवाक्सुमैः ॥

सत्यालङ्करणं वासोभूषणाभं कथानकम् ।
दृश्यते तन्मिथो भिन्नं कवीनां कलनावशात् ॥

विश्रामकं तच्चरितक्रमवस्तुनिरूपणे ।
ऐतिह्यमूलं विविधं सत्यं तेन न भिद्यते ॥

"कलये भगवत्पादशङ्करं प्राच्यवाक्सुमैः" इति काचिदाशा बलवत्युदिता दशभ्यो वत्सरेभ्यः प्राक् । स मनोरथः शताधिकगुणः फलितो गुरुकृपया यन्महतोऽतिविस्तृतात् तद्विषयकप्राच्यवाक्सुमोद्यानात् मन्मनोरुचिरः मकरन्दः मया सम्भृतः, सङ्कलितश्च श्रीशङ्करविजयमकरन्दरूपेण १९७८ वत्सरे, श्रीकाञ्चीकामकोटिपीठाधिपजगद्गुरु श्रीशङ्कराचार्य श्रीजयेन्द्र सरस्वती श्रीचरणानां चरणयोः तेषां पीठाधिरोहणरजतजयन्त्युत्सवावसरे कालट्यां श्री शङ्करभगवत्पादकीर्तिस्तम्भप्रतिष्ठावसरे उपायनत्वेन उपहृतश्च । ततस्तं संगृह्य श्रीशङ्करविजयमकरन्दसारं समकलयं, यश्च त्रिशिरःपुरस्थाचार्यग्रन्थप्रकाशनसमितिः प्राकाशयत् १९८० वत्सरे । श्रीशङ्करविजयमकरन्दस्य तृतीयं संस्करणमधुनैव संपन्नं इति हृदयावकाशाधिकोऽमितस्तोषभरः । न गर्वो ममता वा तत्र, कृतकृत्यं मन्वानस्य मे भावपूरः कोऽपि सात्विकः । गुरुकृपा निदानं तत्र ।

श्रीशङ्करविजयमकरन्दं समीक्षितवतां इदं सुज्ञातं यत्स

ग्रन्थो न मया स्वतन्त्रतया रचितः, परं बृहच्छङ्करविजयादिभ्यः शताधिकेभ्यो मुद्रितामुद्रितेभ्यः तत्र तत्रोपलब्धयैव शब्दानुपूर्व्या सङ्कलितश्लोकाकरग्रन्थपरिचयदानपूर्वकं इतस्ततः सङ्कलितः, कयापि मन्मनोरुचिरया विधया सन्दृब्धश्चेति । तथा सङ्कलने प्रवृत्तस्य प्रतिग्रन्थगत ऐतिह्यमूलकः कविमनश्चित्रणमूलकश्च चरितक्रमवस्तुनिरूपणादौ मिथो विसंवाद उपलब्धः, यं कथमपि सामञ्जस्येन समाधातुं नापारयम् । ऐतिह्यमूलकत्वात् प्रामाणिकाप्रामाणिकचिन्ता दूरे । न केवलं चरितक्रमे, परं कालनिर्णयेऽपि न कोऽपि ग्रन्थ उपाकरोत् ।

किमु तेषां महापुरुषाणां समकालिका वाल्मीकिसदृशा वश्यतथ्यवचसः कवयो नावर्तिषत? तत्सूक्तिसंकलने अक्षरलोपमपि विना तद्गुप्तौ तद्विशदने जागरूका अपि पद्मपादादयः वृत्तसंग्रहे उदासीनाः । भगवत्पादादयस्ते च महापुरुषा न स्वचरितकलने व्यापृताः । तेषामप्रतिमं प्रातिभं चक्षुः परोक्षमपि अध्यक्षितवत् । नीरसोऽपि विषयः तत्सूक्तिजातारूढः सत्यत्वेन एकान्ततः रसभरितो बभूव । ते न स्वचरितग्रथने सादरा इति न चित्रमेतत् ।

तेषां जीवितकालोऽपि अद्यत्वे विसंवादी जातः । संप्रदायैकपरायणतया स्थितवन्तो महामनीषिणोऽपि विद्वांसोऽद्य अन्यत्र संप्रदायमनुसरन्तोऽपि कालविषये संप्रदायं निराकृतवन्त इति चित्रमेतत् । श्रीशङ्करभगवत्पादानां तत्परम्परागतानां च महीयसां जीवितसमयः, तत्तत्परंपरासंप्रदायगोप्तृषु पीठेषु पुण्यश्लोकपूर्वपुरुषस्मरणार्थेषु ग्रन्थेषु प्रायः एकरूपतया रक्षित उपलभ्यते । परं तत्राविश्रंभे विदेशीयविवेचनाप्रसरो हेतुरभवत् । स्वस्वसंप्रदायागतं कालनिर्णयं दूरेऽपास्य विदेशीयैः निर्दिष्टं कालचिन्तनं कथञ्चित् संघटय्य तैः प्रकाश्यते । श्रीभगवत्पादसूक्तिसहस्रे यादृशी श्रद्धा, श्रीभगवत्पादमहिमनि यावती प्रतिपत्तिः, न तावान् विश्रंभः संप्रदायागतेषु गणनेष्विति शोच्येयं दशा ।



अस्तु । सर्वेऽपि शङ्करचरितनिबन्धारः व्यासाचलमाधवादयः ऐतिह्यमेव प्रमाणमुल्लिखन्ति । स्पष्टमुद्घोषयन्ति तथा । "ऐतिह्यमेवात्र वदन्ति चैवं तदेव मूलं मम भाषणेऽपि" इति व्यासाचलो वदति पद्मपादटीकादाहप्रसंगे (व्यासाचलीयशङ्करविजये ८-७६) । अत्रैव सन्दर्भेऽमुमेव श्लोकं तथैवोद्धृतवान् माधवोऽपि । (माधवीयशङ्करविजये १४-१६) ऐतिह्यं विभिन्नम् । न कोऽप्यैतिह्यं एकरूपतया स्रष्टुमीष्टे । लोको भिन्नरुचिः । न सर्वः सर्वमाददाति । न वा एकरूपं प्रकाशयति । अयमेव हेतुः ऐतिह्यविसंवादे ।

शङ्करादर्वाचीनो व्यासाचलो योगीन्द्रः । ततोऽप्यर्वाचीनो राजचूडामणिमखी । ततोऽप्यर्वाचीनो माधवः । माधवः समर्थतम एषु, यत् स्वतन्त्रतया ग्रन्थरचनेऽव्यापृतः, प्राक्तनाचार्यरचितपद्येषु स्वपद्यानि संगमय्य मनोहरं कमपि ग्रन्थमुद्भावयामास । व्यासाचलीय-आनन्दगिरीयशंकरविजयगता राजचूडामणिदीक्षितकृत शंकराभ्युदय रामभद्रदीक्षितकृत पतञ्जलि-चरितगताश्च उपत्रिशतं श्लोका माधवीये तथैव शब्दानुपूर्व्या क्वचिद्द्वित्रपदभेदेन चोपलभ्यन्ते । संकलने प्रवृत्ततया पौर्वापर्यसमीक्षायां प्रतिसर्गं वृत्तबन्धे एकविधे रचनायां, पुनरुक्तिवर्जने वा न माधवः तथा श्रद्दधाति । श्रीशङ्करविजयमकरन्दसङ्कलने मम अग्रगामी आचार्योऽयमेव ।

श्रीमाधवेन सङ्कलनोपयोगितया उपात्तेषु मूलग्रन्थेषु शङ्कराभ्युदयं प्राधान्येन निर्देशमर्हति । यस्य द्वितीयतृतीय-

चतुर्थसर्गेभ्यः १८९ श्लोकघटितेभ्यः १६२ श्लोका माधवेनोपात्ताः। इतरेभ्यः सर्गेभ्यः पञ्च। श्रीमाधवेन स्वसंकलने मूलतयोपात्तमिदमिति परमोपादेयत्वमाकलय्य तस्य प्रकाशनाय प्रवर्ते।

मनोरमं रसिकजनोपजीव्यमिदं शङ्कराभ्युदयं नाम काव्यं अष्टसर्गात्मकम्। अडयारग्रन्थागारगतां तस्य सव्याख्यां मातृकां सहृदयापत्रिकायां प्रकाशितपूर्वं मूलमात्रं चावलम्ब्य सटिप्पणं एतत्प्रकाश्यते। अडयारग्रन्थागारगतायां मातृकायां मूलेन सह व्याख्या षष्ठं सर्गं यावदुपलभ्यते। व्याख्याता चायं यक्षसंस्थान्वयसंभवो भारद्वाजः श्रीमद्बालकृष्णकृपालब्धप्रतिभः श्रीरामकृष्णसूरी आनन्दघनभारतीशिष्यः इति व्याख्यामुखतः सर्गान्तोल्लेखतश्चावगम्यते। शब्दकल्पतरुः, आश्वलायनसूत्रानुसारी प्रयोगकल्पतरुः, सूतसंहितासारः इत्यादयो ग्रन्थास्तत्प्रणीता इति व्याख्यारंभे तेनैव निरूपितम्। सप्तमोऽष्टमश्च सर्गः सहृदयापत्रिकायां उपलब्धः।

महाविदुषा रा. कृष्णमाचार्येण रायपेट्टै वी. कृष्णमाचार्यमहोदयसहकृतेन संपादिता सहृदया पत्रिका; यस्याः षड्वार्षिक (१९१३–१४)७-१० सञ्चिकासु प्रमादीशवर्षप्रकाशितासु अयं सप्तमाष्टमसर्गात्मको भाग उपलभ्यते। तदन्वेषणे प्रवृत्तेन मया तिरुपतिक्षेत्रस्थ श्रीवेङ्कटेश्वरसर्वकलाशालान्तर्गतप्राच्यविभागसंशोधनसंस्थाग्रन्थागारे महता प्रयासेन दृष्टा तस्याः पत्रिकायाः पुराणी मातृका यस्यां संपादकमहोदयेन सप्तमाष्टम सर्गप्रकाशनावसरे प्राक्कथनाय उल्लिखितो भाग इदानीं स्मरणार्हः।

"अत्यद्भुतवाग्विलासास्वादनीयमिदं काव्यं सर्गषट्कपर्यन्तमेवास्माभिरधिगतं प्रकाशितं चेति ज्ञातचरमेव सहृदयानाम्।



अद्य कुंभघोणनगरविराजमानदिव्यश्रीकाञ्चीकामकोटिपीठाधिपैः देववाण्यभ्युदयबद्धदीक्षैः श्रीमच्छङ्करयतिसार्वभौमैः श्रीरङ्गस्थश्रीवाणीविलासमुद्रणालयाध्यक्षस्य गुरुभक्तशिखामणेः श्रीबालसुब्रह्मण्यार्यस्य प्राचीनग्रंथमुद्रणपरिश्रममन्यादृशमभिनन्द्य स्वीयसरस्वतीनिलयात् प्रदत्तेषु ग्रन्थरत्नेषु एकतमात् श्रीशङ्कराभ्युदयकोशात् सप्तमाष्टमसर्गौ समुपलभ्य, तमिमं भागं सांप्रतं सहृदयायां प्रकाशयितुमुपक्रान्ता वयं लोकगुरावस्मिन् कार्तज्ञ्यं वहामः।'

एतदन्वेषणे तत्प्रतिकरणे शोधने चोपकृतवन्तौ मन्मित्रवरौ तिरुपतिस्थकेन्द्रीयसंस्कृतविद्यापीठप्राचार्यः श्री ति. गो. अनन्तसुब्रह्मण्यशर्ममहोदयः मधुरा कामराज सर्वकलाशालासंस्कृतविभागाध्यापकः श्री ल. वीरराघवशर्ममहोदयश्च, तयोः कृतज्ञतां निवेदये।

नाहं साहित्यशास्त्रप्रवीणः। परं कविभिरन्यैरचुंबिताः बह्वीः कल्पनाः अत्रानुभवामि। व्याख्यात्रा श्रीरामकृष्णसूरिणा बहूपकृतं मम पाठशोधने।

कर्ता चास्य काव्यस्य, श्रीराजचूडामणिदीक्षितः। चोलराजधानीं तञ्जापुरीं शासितवतः रघुनाथनायकभूपस्य (१६१४–१६३३ क्रि) सभामयं अलञ्चकारेति इतिहासविदः। महाकवेरस्य पितामहः लक्ष्मीभवस्वामिभट्टः अद्वैतचिन्तामणेः कर्ता। पिता चास्य परमशांभवस्य विद्वदग्रेसरस्य श्रीमदप्पय्यदीक्षितेन्द्रस्य श्वशुरः, तुण्डीरमण्डलगतसूरसमुद्राग्रहारवासी षड्दर्शनीपारदृश्वा सर्वतन्त्रस्वतन्त्रः श्रीनिवासदीक्षितः। सूरप्पनायकेन तत्प्रदेशाधिपेन स्वावासं प्रति तस्य शुभागमनं प्रतीक्षमाणेन दिवापि गजानामुपरि दीपधारिणः संश्रित्पुरतो विधाय

स्वागतव्याहारः कृतः, यो राज्ञां स्वागतकरणे एव प्रदर्श्येत । अतोऽस्य 'दन्तिद्योतिदिवाप्रदीपाङ्कः' इति बिरुदमासीत् । अयं रत्नखेटदीक्षित इत्यपि प्रसिद्ध आसीत् ।

**सन्ध्यासन्धुक्षितांभोधरनलिकगणादुद्गतान् सीसखण्डान्**
**ताराकाराञ्निरोद्धुं शशिरविकपटाद्विभ्रतो रत्नखेटौ ।**
**अन्योन्यं युध्यमानावुदयचरमभूभृत्प्रवीराविति द्राक्**
**उक्त्या ख्यातापराख्यः क्षितिपतिवचसा रत्नखेटाध्वरीति ॥**

इति राजचूडामणि दीक्षित कृत रुक्मिणी परिणयाख्य महाकाव्य-व्याख्यात्रा बालयज्ञवेदेश्वरेण 'सन्ध्यावर्णनचातुरीप्रमुदितेन राज्ञा कृतं नाम रत्नखेटाध्वरीति' कथ्यते । स्वपितरि रत्नखेटदीक्षिते कवेरस्य परा भक्तिः स्वपूर्वजेषु परमादरश्च श्रीशङ्करभगवत्पाद-विजययात्रावसरे,

**पवित्रयन्नत्र स भैक्षचर्यया स्वयं भवस्वामिसुधीनिकेतनम् ।**
**पिनाकिनीं प्राप धुनीं निवर्तते पिनाकिनी यत्र निमज्जतां तनुः ॥**
(७-४०)

**निरीक्षमाणः पथि सत्यमङ्गलं निवासयोग्यं मणिखेटयज्वनः ।**
**पयोनदीं प्राप पयो यदम्भसा विमिश्रितं वेत्तुमलं न सारसाः ॥**
(७-४४)

इति पिनाकिनीपयोनदीतीरयात्राव्याजेन प्रकटीक्रियते । रत्न-खेटाध्वरिणो द्वितीयः पुत्रः अर्धनारीश्वरदीक्षितः । ईश्वर-दीक्षित इत्यपि तं वदन्ति । सोऽस्य विद्यागुरुः । अत एव सर्वत्र सर्गान्ते "श्रीमदर्धनारीश्वरगुरुचरणसहजतालब्धविद्या-वैशद्यस्य" इति स्मरणेन, ग्रन्थारम्भ एव 'अधीत्य निखिलं शास्त्रमग्रजादीश्वरेष्टिनः" इति स्मरणेन च गुरुभक्तिं प्रकटयत्ययं कविः ॥



**परमशाम्भवोऽयं कविः गीर्वाणेन्द्रयतीश्वरमात्मनो गुरुं ग्रन्थारम्भे प्रस्तौति ।** प्रपञ्चसारसारसंग्रहकर्ता चायं गीर्वाणेन्द्र-सरस्वतीनामको यतीश्वरः, श्रीमद्बोधेन्द्रसरस्वतीश्रीचरणैः श्रीनीलकण्ठदीक्षितेन्द्रैश्च परमया भक्त्या स्मर्यते । (पृ. ३) प्रपञ्चसारसारसंग्रहे आदावन्ते च स्वगुरून्प्रणमत्येवं, यथाऽऽदौ—

**"नत्वा श्रीशङ्कराचार्यं अमरेन्द्रयतीश्वरम् ।**
**कुर्वे प्रपञ्चसारस्य सारसंग्रहमुत्तमम् ॥"**

अन्ते च,

**"शङ्करश्चामरेन्द्रश्च विश्वेश्वर इति त्रयः ।**
**पुनन्तु मामकीं बुद्धिं आचार्याः कृपया मुदा ॥**
**अमरेन्द्रयतिः शिष्यो गीर्वाणेन्द्रस्य योगिनः ।**
**तस्य विश्वेश्वरः शिष्यः गीर्वाणेन्द्रोऽहमस्य तु ।**
**शिष्यः प्रपञ्चसारस्य व्यदधां सारसंग्रहम् ॥** इति ।

भगवत्पादश्रीशङ्कराचार्यः प्रपञ्च ाराख्यस्य मन्त्रशास्त्र-प्रकरणग्रन स्य रचयिता। तस्य सारसंग्रहो गीर्वाणेन्द्रेण प्रणीतः । अतः प्रथमं तं प्रणमति । ततः स्वगुरुं अमरेन्द्रम् । गीर्वाणेन्द्रस्य शिष्योऽमरेन्द्रः, तच्छिष्यो विश्वेश्वरः, तच्छिष्यो गीर्वाणेन्द्रः राजचूडामणिदीक्षितगुरुः । अमरेश्वरविश्वेश्वरयोरुभयोः सकाशादयं गीर्वाणेन्द्रयोगीन्द्रः प्राप्तविद्य इति प्रतीयते । (पृ.३)

**शङ्कराभ्युदयगता श्रीशङ्करकथा**—कालविषये मौनी कविः । तथैव पीठविषये । भैरवो नृसिंहान्मोचितः, तदभीष्टां सिद्धिं च प्रापितः इति भगवत्पादोचितो व्यवहारः । (पृ. ५१) क्वचित्क्रमभेदं विना प्राच्यैरुदाहृतैव कथा स्वीकृता । पतञ्जलि-चरितप्रणेत्रा रामभद्रदीक्षितेन कृते पतञ्जलिचरितकाव्ये अस्मिन् काव्ये च काञ्च्येव सिद्धिस्थलम् । तत्रैव कथासमाप्तिश्च ।

कथाक्रमपौर्वापर्यं अकिञ्चित्करम् । भगवत्पादानां द्वे मूर्ती । एका तद्विरचितशताधिकदिव्यप्रबन्धरूपा सूक्तिमयी योगिभिर्भक्तैः अन्यैश्च मादृशैः पामरैः सततं बहुधा अनुसन्धीयमाना, सदैवैकरूपापि बहुभिर्बहुधा व्याख्याता । मूर्तिरन्या, "शंभोर्मूर्तिश्चरति भुवने शंकराचार्यरूपा" इति सार्धवत्सरसहस्रयुग्मे तत्र तत्र भगवत्पादप्रवर्तितपीठेषु विराजमानैः परमहंसपरिव्राजकाचार्यवर्यैः तन्मनस्कैस्तदालापैस्तद्विचेष्टैस्तदात्मकैः, तद्गुणानेव गायद्भिः स्वाचरणेन तदभेदं प्रकटयद्भिः अनारतं स्मार्यमाणा, काञ्ची-कालटी-प्रयाग-रामेश्वर-हरिद्वारेषु दिव्यालयेषु गृहीतविग्रहा भक्तैः प्रणम्यमाना, विविधालङ्करणा, विविधकाव्यशतगीयमाना । उभयोर्मूर्त्योः भक्तिं वर्धयदिदं काव्यं विचित्रं सहृदयैरास्वाद्यमिति समर्पये तेषां पुरतः ।

एतस्य चानुबन्धात्मकः श्रीरामभद्रदीक्षितकृतात् पतञ्जलिचरितनामकात्काव्यात् श्रीगोविन्दभगवत्पादश्रीशङ्करभगवत्पादचरितसंबद्धो भागः श्रीशङ्करभगवत्पादचरितामृतसेवार्थिभिरास्वादनीय इति धिया अन्ते योजितः । निर्णयसागरमुद्रणालयात्प्रसृतायां काव्यमालायां प्रकाशितचरं अद्यत्वे दुष्प्रापमिदं काव्यम् ।

चिराय पूर्णो मनोरथः । श्रीमद्भगवत्पादचरिताब्धितीरे सञ्चरता मया यदृच्छया समासादितमिदं ग्रन्थरत्नम् । तद्भवतां पुरत उपह्रियते । एतेन प्रसीदन्तु मयि जगद्गुरवो भगवत्पादाः तत्प्रतिष्ठितश्रीकाञ्चीकामकोटिपीठाधीशाश्च ।। शम् ।

22, वीरेश्वरं अप्रोच् रोड्,
श्रीरंगम्-620006

शि. वे. राधाकृष्णशास्त्री

।। श्रीगुरुभ्यो नमः ।।

# ।। श्रीशङ्कराभ्युदयः ।।

श्री राजचूडामणिदीक्षितविरचितः ।

## प्रथमः सर्गः

अस्ति स्वस्तिकृदस्तोकशस्तिश्चूडामणिर्मखी ।
कर्त्रोर्विश्वजितः पुत्रः कामाक्षीश्रीनिवासयोः ।।१।।

अधीत्य निखिलं शास्त्रमग्रजादीश्वरेष्टिनः ।
विदुषां प्रीतये येन व्याकृता शास्त्रदीपिका ।।२।।

यत्नं विनैव विहितो येन तन्त्रशिखामणिः ।
नव्या सङ्कर्षकाण्डस्य न्यायमुक्तावलिस्तथा ।।३।।

न्यायचूडामणिर्नाम्ना न्यायजातोपबृंहिता ।
रुचिदत्तस्य च व्याख्या रुचिरा येन निर्मिता ।।४।।

---

### टिप्पणी

श्रीगुरुभ्यो नमः ।

दयमानदीर्घनयना देशिकताभव्यदक्षयदक्षकरा ।
वामकरनिहितदण्डा पुरतो मम भातु सा गुरोर्मूर्तिः ।।

दण्डालग्नकरांबुजं पदयुगश्लिष्यद्वटीपादुकं
शीर्षारोपितभक्तदत्ततुलसीबिल्वादिमालाभरम् ।
मार्गाभ्यागतसज्जनार्पितसाष्टांगप्रणामोन्मिषत् -
कारुण्यं हृदि भावये गुरुवरं श्रीकामकोटीश्वरम् ।।

अथ श्रीराजचूडामणिदीक्षिताभिधोऽयं कविः स्वप्ने स्वगुरुणा समादिष्टः श्रीशङ्करभगवत्पादचरितवर्णनपरं काव्यमिदं प्रस्तौति ,

**काव्यप्रकाशिकायाश्च यः करोति स्म दर्पणम् ।**
**कर्णामृतायमानानि काव्यानि च तथा शतम् ॥५॥**

---

अनिदंपूर्वतया आत्मानमेव प्रथमं पञ्चभिः श्लोकैः प्रस्तुवन् । चूडामणिरित्यपि प्रथा तस्य । अयं मखी, पितरौ मखिनौ, दंपत्योः सहाधिकारात्, अग्रजोऽपि मखीति कुलेन जन्मना शुद्धः ॥१॥

ईश्वराख्योऽग्रजः अर्धनारीश्वरदीक्षित इति प्रथितः, कालिदासकृतस्य अंबास्तवस्य व्याख्याता, चूडामणेर्गुरुः ॥२॥

काव्यप्रकाशदर्पणान्ते अत्रानुद्दिष्टान् स्वकृतग्रन्थानेवं नाम्ना संगृह्णाति कविरयम् ।

व्याकृता याजुषी शाखा तथोपनिषदोऽखिलाः ।
प्रणीता चाग्निहोत्रादेः प्रायश्चित्तप्रदीपिका ॥

मणिदर्पणनामानं महितं वाङ्मुखं मणेः ।
खण्डत्रयस्य दुर्बादिखण्डनाय व्यधत्त सः ॥

येन शृंगारसर्वस्वनामा भाणोऽप्यभण्यत ।
यश्चैकाह्ना भोजचंपोर्युद्धकाण्डमपूरयत् ॥

येन भारतचंपूश्च वृत्ततारावली तथा ।
विहिता शङ्कराचार्यतारावल्याः सहोदरे ॥

सर्वतन्त्रस्वतन्त्रस्य श्रीनिवासमखीशितुः ।
कर्तुर्विश्वजितो येन तातस्य यमिता कथा ॥

रघुवीरस्य कृष्णस्य पांडवानां च याः कथाः ।
प्रत्यक्षरश्लेषमयैः पद्यैर्हृद्यैरवर्णयत् ॥

यमिता मञ्जुभाषिण्या येन सीतापतेः कथा ।
शंकराभ्युदयाभिख्यं काव्यं येनैव निर्मितम् ॥

काव्यं कंसवधं रुक्मिण्युद्वाहमपि यो व्यधात् ।
येनोदिता कमलिनीकलहंसाख्यनाटिका ॥



**शर्वर्याश्चरमे यामे शयानस्स कदाचन ।**
**गीर्वाणेन्द्रगुरुं बुद्धया गीर्वाणेन्द्रमलोकत ॥६॥**

**अनुग्रहादाप्तविद्यं अमरेश्वरयोगिनः ।**
**विश्वेश्वरयतीशानविनेयं विनयोज्ज्वलम् ॥७॥**

**पर्यायशङ्कराचार्यं पारे वाचामवस्थितम् ।**
**प्रपञ्चसारप्रमुखप्रबन्धकृतिवेधसम् ॥८॥**

**प्रत्यग्ब्रह्मैक्यनिध्यानप्रहसन्मुखपङ्कजम् ।**
**तत्तन्मन्त्रानुसन्धानतत्परं तमसः परम् ॥९॥**

---

आनन्दराघवं नाम नाटकं च प्रपञ्चितम् ।
येन व्यतान्यलङ्कारचूडामण्यभिधा कृतिः ॥

अथ वृत्तिविवेकेन विचिता चित्रमञ्जरी ।
येन व्यतानि श्रीराजचूडामणिमखीन्दुना ॥
काव्यदर्पणनामासौ प्रबन्धो विदुषां मुदे । इति ॥५॥

गुरुं प्रस्तौति — अमरेश्वरयोगिनः तन्नाम्नो गुरोः प्राप्तविद्यं विश्वेश्वरयतीशानस्य शिष्यं, यं शिष्टाः स्वगुरुनाम साक्षान्न कथनीयमिति हेतुना, श्रीशंकराचार्यशिष्यपरंपरान्तेवासित्वेन वा विवेकवैराग्यनानातन्त्रपारंगतत्वादिसंपत्तिभिः श्रीशंकरभगवत्पादसादृश्येन वा श्रीशंकराचार्य इति पर्यायेण नामान्तरेण व्यवहरन्ति । अयं प्रपञ्चसाराख्यभगवत्पाद श्रीशंकराचार्यकृतमन्त्रशास्त्रग्रन्थविवरणभूतस्य प्रपञ्चसारसारसंग्रहस्य कर्ता । भगवन्नामबोधेन्द्रसरस्वतीस्वामिपादाः श्रीशंकरभगवत्पादप्रतिष्ठित श्रीकामकोटिपीठाधिष्ठाने ५९ तमाचार्यत्वेन व्यराजन्त । ते अद्वैतभूषणाख्ये स्वकृते ग्रन्थे गुरुमेनं प्रणमन्ति —

गीर्वाणेन्द्रयतीन्द्राणां चरणांबुरुहद्वयम् ।
स्वर्गापवर्गदं पुंसां नौमि विघ्नोपशान्तये ॥ इति ॥

**तथा ते स्वकृतायां आत्मबोधटीकायां—**

कृपया चोदितस्तेन कृपणानुजिघृक्षुणा ।
स एष कुरुते काव्यं शङ्कराभ्युदयाभिधम् ॥१०॥

श्रीशङ्करभगवत्पादावतारः

केरलेषु नभोलङ्घिकेरभूरुहशालिषु ।
अस्ति कश्चिन्महानग्रहारः कालटिनामकः ॥११॥

विद्याधिराज इत्यस्मिन् विश्रुतान्वयनामकः ।
विपश्चितामग्रगण्यो व्याकुर्वाणो विदिद्युते ॥१२॥

यस्य नाम्ना शिवगुरुस्तनयो विनयोज्ज्वलः ।
महितोऽजनि यत्पत्नी मखपण्डितकन्यका ॥१३॥

अध्यैष्ट चतुरो वेदानयष्ट स महाध्वरैः ।
अलब्ध निखिलान्कामानन्तरेण सुतोदयम् ॥१४॥

ततस्स तनयाकांक्षी तरुणीसचिवश्चिरम् ।
तपसा तोषयामास तरुणेन्दुशिखामणिम् ॥१५॥

---

अद्वैतपीठस्थितदेशिकं तं हृद्यात्मविद्याविशदान्तरङ्गम् ।
नित्यं भजामो विशदस्वरूपं गीर्वाणयोगीन्द्रगुरुं हृदन्तः ॥

इति प्रणमन्ति ।

"अर्धे तनोरद्रिसुतामयोऽस्मीत्यहंयुना किं फलमादियूना ।
गीर्वाणयोगीन्द्रमुपास्महे तं सर्वात्मना शैलसुतात्मको यः ॥"

इति शिवलीलार्णवे श्रीनीलकण्ठदीक्षितेन्द्राः स्मरन्त्येनम् ॥९॥

अग्रे, ग्राममुभयतः हरिहरौ दिव्यालयस्थौ-यत्र सः अग्रहारः । समुदायस्वे बहवो भागिनः. तत्र देवालयो विप्राश्च अग्रिमं भागं हरन्ति इति, ते यत्र सः अग्रहारः ॥१२॥

मखपण्डितस्य कन्यका आर्याम्बा । मखपण्डितः कालटीसमीपस्थे मेलपाळूर् इति ग्रामेऽवसदिति प्रथा ॥१५॥



सामिनीलवपुस्साक्षात् यामिनीशार्धशेखरः ।
वाचमूचे प्रसन्नात्मा वाञ्छिताधिकदायिनीम् ॥१६॥

वरयस्व बहून्पुत्रान् वत्स! मूढांश्चिरायुषः ।
सर्वज्ञमेकमथवा सौम्य संकुचितायुषम् ॥१७॥

संमन्त्र्य प्रियया तेन सर्वज्ञे तनये वृते ।
अन्तर्धिमतनिष्टासावनन्तर्द्धिकरो विभुः ॥१८॥

आकुलं जगदुद्धर्तुं अद्वैतपरिपन्थिभिः ।
जठरं तद्विलासिन्या जगदीशोऽभजत्स्वयम् ॥१९॥

आनीलरोमवल्लीकमलक्षितवलित्रयम् ।
बभार पाण्डुवक्षोजं बाला दौहृदलक्षणम् ॥२०॥

खिद्यमानाऽपि नर्मोक्तौ किञ्च मञ्चाधिरोहणे ।
विजित्यान्यानसावैच्छद्विद्यासिंहासने स्थितिम् ॥२१॥

समानापि ससत्वानां विषयेषु विरागिता ।
सुदृशोऽजनि गर्भस्य सुतचारित्रशंसिनी ॥२२॥

शुचिस्मितायाः शुशुभे रुचिरा रोमवल्लरी ।
वेणुर्नव इव न्यस्तो वेधसाऽस्य शिशोः कृते ॥२३॥

---

मूढबहुपुत्रवरणे वत्सेति संबोधनं बालवदज्ञस्त्वं इति बोधनाय । सर्वज्ञपुत्रवरणे सौम्येति, तदा प्राज्ञो युक्तकारीति ॥१७॥

धर्मरक्षणाय सन्ततिः प्रार्थ्यते । चिरायुषामपि मूढानामपत्यत्वे धर्मरक्षणाय इत्याशा दूरे । सर्वज्ञस्यापत्यत्वे अदीर्घजीवितत्वात् वंश-प्रतिष्ठायै इत्याशा दूरे । उभयथापि आशाभंगे समे, मूढापेक्षया सर्वज्ञो वरम् । अनन्तर्धिकरो भगवान् वृतादधिकं दद्यादेव ॥१८॥

पयोधरमिषात्तन्व्याः पयःपानोचितौ शिशोः ।
कलशावमृतापूर्णौ कलयामास कञ्जभूः ॥२४॥

द्वैतवादं कुचद्वन्द्वे मध्ये माध्यमिकं मतम् ।
गर्भस्थ एव पृथुको गर्हयामास सुभ्रुवः ॥२५॥

शुभंयुनि दिने सूनुमहंयुकुमतासहम् ।
प्रासूत गुहमातुः सा सासूयेव शुचिस्मिता ॥२६॥

दिग्भिः प्रसेदे पवनैः दिव्यगन्धैरभूयत ।
प्रदक्षिणीभवज्ज्वालैः जज्वले ज्वलनैरपि ॥२७॥

ततः शिवगुरुः स्नातो धवलाम्बरसंवृतः ।
वित्तेशमधरीकुर्वन् दत्ते स्म विविधं धनम् ॥२८॥

पुरोधसं पुरस्कृत्य पुण्याहविधिपूर्वकम् ।
चकार स विधानज्ञो जातकर्मादिकाः क्रियाः ॥२९॥

---

पूर्वं कुचद्वैत अभूत् । शंकरे गर्भगे तत्कालोचितस्तनोपचयेन स्तनद्वैतभानं नष्टम् । द्वैतवादो निरस्त इव । पूर्वं तन्व्यास्तस्या मध्यभागः शून्यप्राय आसीत् । अधुना गर्भभरालसाया उच्छूनोदरायाः सा शून्यता ध्वस्तेव । माध्यमिकाः शून्यवादिनो बौद्धा अपि पृथुकेनानेन निरस्ताः । पृथुकः शिशुः, पृथु उच्चैः कायति शब्दायते इति, प्रथते इति, इदानीं शिशुरपि पृथुर्महान् बुभूषते इति वा । गर्भस्थ एवायं द्वैतमाध्यमिकवादनिरसनेन पृथुर्महान् बुभूषत इव ॥२५॥

गुहमाता पार्वती न गुहं गर्भे दधार, न प्रासूत, न पुपोष वा स्तन्येन । इयं मासान्नव गर्भे धृत्वा प्रसूय स्वस्तन्येन पोषितवतीति पार्वतीतोऽपि गरीयसी ॥२६॥



अर्धेन्दुशेखरस्यायमवतारममुं विदन् ।
शङ्करं जगतां चक्रे शङ्करं नामतोऽपि सः ॥३०॥

श्रीशङ्करबाललीला

मञ्चेऽथ शायिते बाले मानसं पूरितं सताम् ।
वीक्षमाणे मणीगुच्छान् विनीलं विद्विषां मुखम् ॥३१॥

पद्भ्यां सन्ताडयन्नेव पर्यङ्कफलकं शनैः ।
बिभेद शतधा सद्यो भेदवादिमनोरथान् ॥३२॥

द्वित्रान्वर्णान्वदत्यस्मिन् द्वैतिनो मौनिनोऽभवन् ।
पद्भ्यां सञ्चरमाणे तु परायन्त दिशो दश ॥३३॥

आक्षपादमुखान्ग्रन्थान् आर्हताद्यागमानपि ।
पपाठ मुनिरासाय प्रागेवोपनयादसौ ॥३४॥

उपनयनं विद्याग्रहणं च

अकृत्वोपनयं ताते हन्त दिष्टगतिं गते ।
उपषष्ठे वयस्येष उपानीयत बन्धुभिः ॥३५॥

---

क्रियैकत्र, विकृतिः फलं चान्यत्र ॥३१, ३२॥

उपषष्ठं-पञ्चमं वयः । "शिवगुरुरुपनीय शङ्करार्यं निगममशेषमथाध्यजीगपत्तम् । नियतिरिदमसासहिर्हि नीचा नियतमनीनयदन्तरे गुरुं ताम् ॥" इति बृहच्छङ्करविजये । "चौलं कर्म समाप्य चोपनयनं ताते दिवं प्रस्थिते" इति प्राचीनशङ्करविजये । "उपनीय दिवं गते स्वताते" इति सदाशिवब्रह्मेन्द्राः जगद्गुरुरत्नमालायाम् । चिद्विलासीये च तथैव । परं 'उपनीतिमकृत्वैव इति आनन्दगिरीये । 'तं पञ्चमाब्द उपनेतुमनाः स एव पञ्चत्वमाप' इति व्यासाचलीये । 'बाल्य एव मृते ताते जनन्या परिपोषितः । उपनीत' इति गोविन्दनाथीये । 'उपनीत-

अधीत्य चतुरो वेदान् अङ्गषट्कोपबृंहितान् ।
अरंस्त जैमिनीयेऽध्वन्यधियोगमजागरीत् ॥३६॥

इतिहासपुराणादीन्वीक्षमाणः स्मृतीरपि ।
सर्वज्ञपदवीं लेभे सप्तमे हायने वटुः ॥३७॥

अधीतमखिलं शास्त्रमालोक्य स पुनः पुनः ।
व्याख्याय सौख्यभरितान्विधेयन्विदधेतमाम् ॥३८॥

राजशेखरनामाऽथ राजा तं द्विजशेखरम् ।
स्वभ्यर्च्य श्रावयामास स्वकृतं नाटकत्रयम् ॥३९॥

अनुजज्ञे गृहान्गन्तुं अभिनन्द्य जनाधिपम् ।
दृशापि नास्पृशत्तेन दत्तानि द्रविणानि सः ॥४०॥

निरीक्ष्य मातरं मङ्क्तुं निम्नगां गन्तुमक्षमाम् ।
निर्ममे योगशक्त्यासौ निष्कुटेऽम्बाभिधां नदीम् ॥४१॥

---

स्तदा मात्रा' इति शिवरहस्ये । 'उपनयं किल पञ्चमवत्सरे....द्विजवधूर्नियता जननी शिशोर्व्यधित' इति माधवीये । अत्र च "उपनयमकृत्वा दिष्टगतिं याते ताते बन्धुभिरुपानीयत" इति । उपनयनं द्विः क्रियते, प्रथमं ब्रह्मरूपगायत्र्युपदेशेन द्विजत्वापादनेन ब्रह्मणः समीपे नयनं असावादित्यो ब्रह्म, ब्रह्मैवाहमस्मि इति ब्रह्मभावनामुख्यकसन्ध्याक्रमकरणयोग्यतासाधनेन, पश्चात् उपाकर्मणा ब्रह्मणो वेदस्य समीपे नयनं वेदाध्ययनयोग्यतासाधनेनेति । प्रथमं पिता चकार, दिवंगते तस्मिन् उपाकर्मणा वेदाध्ययनयोग्यतासिद्धि माता बन्धुवर्गो वेति सङ्गतिरत्र युक्ता भाति ॥३५॥

अम्बाभिधां नदीं प्र निद्या उत्तरशाखाभूतां–"अम्बाहितार्थमानीता पुत्रेणात्मगृहान्तिकम् । अंबापगेति चाख्याता" इति गोविन्दनाथीये ॥४१



तत्तटे भवनं शौरेः तरङ्गाहतिभङ्गुरम् ।
उद्धृत्य नातिदूरेऽथ योगशक्त्या चकार सः ॥४२॥

संन्यासस्वीकरणम्

ततः शुद्धात्मने तस्यां तटिन्यां मज्जनोन्मुखः ।
ग्राहेण सान्द्रेणैष गृहीतचरणोऽभवत् ॥४३॥

अवहारगृहीताङ्घ्रिः आपद्यत्यन्तधीरधीः ।
अन्तिके स निमज्जन्तीमंबामित्यमवोचत ॥४४॥

नक्रोऽयं वक्रदंष्ट्रो मां नयत्यतिबलो जले ।
करवाणि किमम्बाहं कालो हि दुरतिक्रमः ॥४५॥

अष्टमूर्तिरदान्मां मां अष्टवर्षैकजीविनम् ।
विधिना विहितः कालो विषमोऽयमुपागतः ॥४६॥

पुत्रकृत्यमकृत्वा मत्पुत्र यासि कथं न्विति ।
उच्चकै रुदतीमेनां उवाच स पुनः सुधीः ॥४७॥

चतुर्थमाश्रमं प्राप्य जन्मान्तरतयोदितम् ।
पुत्रकृत्याय जीवामि पुनरष्टावहं समाः ॥४८॥

---

गृहीतसंन्यासेन गृहात्प्रव्रजनात्पूर्वं देवालयोद्धरणमिति व्यासाचलीये माधवीये गोविन्दनाथीये च ॥४२॥

अवहरतीत्यवहारो नक्रः । आपदि प्रथमं धीर्व्यापद्यते । अस्य तु तदानीं धीरा धीः ॥४४॥

अष्टमूर्तिः - पृथिव्यादिभूतपञ्चक - सूर्य-चन्द्र-यजमानाख्य-मूर्त्यष्टकयुतः शंभुः । विषमः जीवितान्तकरः ॥४६॥

तया तथेत्यनुज्ञातस्तपस्विन्या कथञ्चन ।
संन्यस्तोऽहमिति प्राह सन्निरुध्येन्द्रियाणि सः ॥४९॥

ततो दिव्याम्बरधरस्तप्तचामीकरप्रभः ।
देवभूयंगतो नक्रो दिवि तिष्ठन्नवोचत ॥५०॥

भवत्प्रसादान्मुक्तोस्मि भारतीप्रियशापतः ।
क्षमस्व मन्तुमित्युक्त्वा क्षणादन्तरधत्त सः ॥५१॥

प्रव्रज्या गुरुसेवा च

सान्त्वयञ्जननीं काले सन्निधानप्रतिज्ञया ।
पर्याप्तधैर्यः प्रसभं प्रवव्राज स शङ्करः ॥५२॥

शिष्यं शुकर्षिशिष्यस्य गौडपादयतीशितुः ।
गोविन्दभगवत्पादं गुरुमग्रे ददर्श सः ॥५३॥

---

एष गन्धर्वः पुष्परथो नाम ब्रह्मशापान्नक्रतां गतः आचार्यपादपादस्पर्शात् ततो विमुक्तः इति क्वचित् ॥५१॥

अग्रे नर्मदायास्तीरे ॥५३॥

फणाधरशिखामणिरादिशेषः । पातालं गत्वा आदिशेषात् येन योगशास्त्रेण सह कृत्स्नं व्याकरणमपि साधितं पूर्णतया अधीत्यावगतं, तं गोविन्दभगवत्पादम् । कथैषा अत्रानुसन्धेया । चिदंबरे सभानटो देवः परमेश्वरो ननर्त । पाणिनिर्नाम कश्चन तापसः तस्य नृत्यतः हस्तगताया ढक्काया नादादवगतैः वर्णजालैः लब्धबोधः व्याकरणसूत्राणि निर्ममे । यानि वररुचिः वार्तिकेन व्याचख्यौ । विष्णोः पर्यंकभूतः आदिशेषः विष्णोरवगतनटेशमाहात्म्यः नटनं दिदिक्षुर्भुवमागतः सुतार्थिन्या गोण्याः सवित्रेऽर्घ्यमर्पयन्त्या हस्तात्पतन् तस्याः पुत्रीभूय पतञ्जलिनामा चिदंबरे नटेशानं दृष्ट्वा सिद्धोऽभूत् । भगवान् नटेशः तमादिदेश पाणिनीयसूत्राणां भाष्यकरणे । तदाज्ञया संपन्नं भाष्यं



पातालतलमाविश्य फणाधरशिखामणेः ।
येन व्याकरणं कृत्स्नं योगेन सह साधितम् ॥५४॥

तस्य प्रसादमासाद्य तत्तादृशदयानिधेः ।
संन्यासगृह्यविहितं सर्वं कर्माचरत्सुधीः ॥५५॥

कृष्णद्वैपायनाचार्यकृतसूत्रानुरोधतः ।
कृत्रिमेतरवाङ्मौलिं कृत्स्नमस्मादबुद्ध सः ॥५६॥

---

सहस्रसंख्येभ्यः शिष्येभ्यो बोधयितुं गृहीतसहस्रफणः जवनिकान्तर्गतः स्वतेजः शिष्येभ्यः संवृण्वन् पतञ्जलिरुपदिदेश समयेन, न कोऽपि जवनिकां उत्क्षिपेत् न वा बहिर्गच्छेत् इति । गौडः कश्चित् पाठमध्ये बहिर्ययौ । अन्यः कश्चिज्जवनिकां उदक्षिपत् । सर्वे शेषतेजसा दग्धाः । बहिर्गतो गौडः शिष्य एकोऽवशिष्टः । पतञ्जलिः नियमभंगाद् ब्रह्मरक्षोभावभीतं तं अनुजग्राह, "शिष्यस्ते भविता कश्चित् । तस्मै मत्कृतिमध्यापय। शापान्मुक्तो भवे.' इति । तं नत्वा ततः प्रस्थाय गौडो रेवातट जगाम शिष्यं प्रतीक्षमाणः । निजां सहस्रमुखीं मूर्तिमुग्रां दृष्ट्वा अन्तेवसन्तः शिष्या मा भैषुरिति कृपया शान्तः एकाननेन कतिचन शिष्यानन्वग्रहीत् पतञ्जलिः । ततः पातालं स्वस्थानं जगाम । रक्षोभावमापन्ने शिष्ये गौडे दयमानः स्वांशेन चन्द्रशर्मनामानं विप्रमवतारयामास । स विप्रवटुश्चन्द्रशर्मा पातालतलमाविश्य शेषात् व्याकरणयोगदर्शनेऽधिजगाम । पश्चात् रेवातटे गौडं स्वकीयव्याकरणज्ञानेन सन्तोष्य, तस्मादधीतपातञ्जलभाष्यः लब्धगार्हस्थ्यो बभूव । गौडोऽपि शुकाचार्यात् गृहीतपारमहंस्यो जीवन्मुक्तो माण्डूक्योपनिषद्विवृतिप्रमुखग्रन्थप्रणेता बभूव यं गौडपादा इत्याहुः । चन्द्रशर्मापि विरतो गौडपादेभ्यो गृहीतपारमहंस्यो रेवातीरे शिष्यार्थी उवास इति ॥५४॥

तत्तादृशेति स्वरूपप्रकारस्मारकौ दयाया अनिरूप्यत्वं ख्यापयतः । गृह्यन्ते संगृह्यन्ते कर्मकलापक्रमबोधकानि वाक्यान्यत्रेति गृह्यं, आपस्तंबादिप्रणीतं, सन्न्यासविषयकगृह्यविहितं कर्म ॥५५॥

कृत्रिमेतरा अपौरुषेया वाक् नित्या श्रुतिरूपा । तन्मौलिरुप-

ग्रन्थनिर्माणम्

**गुरोर्गोविन्दपादस्य गुणराशेरनुज्ञया ।**
**विष्णोर्नाम्नां सहस्रस्य व्यतानीद्भाष्यमादितः ।।५७।।**

**मन्त्रागममहाम्भोधिं मथित्वा बुद्धिमन्थतः ।**
**प्रपञ्चसारप्रमुखप्रबन्धामृतमाददे ।।५८।।**

**सौभाग्यविद्यामपि तां सुभगोदयपद्धतिम् ।**
**निर्ममे मन्त्रशास्त्रार्थनिक्षेपमणिपेटिके ।।५९।।**

---

निषद्रूपः । तं अबुद्ध अर्थतोऽवगतवान् ।।५६।।

प्रथमं विष्णुसहस्रनामभाष्यग्रथनम् । कथा चात्रानुसन्धेया- दुर्मतनिरासाय यथार्थग्रहणाय च श्रुतिस्मृतिपुराणाख्यप्रस्थानत्रयगतात्म-विद्याप्रतिपादकग्रन्थानां भाष्यरचनाय श्रीगोविन्दभगवत्पादैरादिष्टः शंकरः प्रथमं कं ग्रन्थं भाष्यरचनायाददामिति विचारयन्नास्त, यावता तत्र यदृच्छयोपगता काचन बालिका विष्णुसहस्रनामग्रन्थमादाय भगवत्पाद-समीपे न्यस्तवती । तां ईश्वरदत्तां प्रेरणामाकलय्य प्रथमं विष्णु-सहस्रनाम्नां भाष्यं रचयामास इति ।।५७।।

सौभाग्यविद्या सुभगोदयपद्धतिश्च मन्त्रशास्त्रार्थरूपमणिनिधानाय मञ्जूषारूपे । इमौ ग्रन्थौ विशिष्य चूडामणिदीक्षितेन पूर्णतया अधीतौ तद्भ्रातृसकाशादिति प्रतीयते । अम्बास्तवव्याख्यानारम्भे अस्य कवे-रग्रजः अर्धनारीश्वरदीक्षितः एवं प्रस्तौति—"कामाक्षीतनयः श्रीमानर्ध-नारीश्वरस्सुधीः । अम्बास्तवस्य व्याख्यानं कुरुते गुरुसंमतम् । (गुरुणा स्वपित्रा रत्नखेटश्रीनिवासमखिना सम्मतं) श्रीशङ्कराचार्यकृतौ प्रबन्धौ सौभाग्यविद्यासुभगोदयाख्यौ । पुनश्च तौ साधु विचिन्त्य बुद्ध्या तदर्थव-नाहं करवै निबन्धम्" ।। इति । श्रीविद्यासंप्रदायानुगे अस्मिन् गुरुकुले एतौ ग्रन्थौ विशिष्य पाठ्यतया गृहीताविति प्रतीयते ।।५९।।



**सगुणब्रह्मबोधैकसक्तान् मन्दाधिकारिणः ।**
**अनुगृह्णन्नथातानीदसौ हरिहरस्तुतीः ।।६०।।**

**अतन्तनीत्प्रकरणान्यद्वैतात्मपराणि सः ।**
**सौन्दर्यलहरीमुख्याः स्तुतीरपि परश्शताः ।।६१।।**

**करतलकलिताद्वयात्मतत्त्वं क्षपितदुरन्तचिरन्तनप्रमोहम् ।**
**उपचितमुदितोदितैर्गुणौघैः उपनिषदामनमुज्जहार भाष्यम् ।।**

**सोऽयं कदाचन शुभानि निषेवमाणः**
**तीर्थानि तैर्थिकजनैस्सह तीर्थपादः ।**
**गौरीगुरोः स्रवदमन्दझरीपरीतां**
**खेलज्झरीयुतदरीं बदरीमयासीत् ।।६३।।**

**स द्वादशे वयसि तत्र समाधिनिष्ठैः**
**ब्रह्मर्षिभिः श्रुतिशिरो बहुधा विचार्य ।**
**श्रीव्यासदेशिकशिखामणिसूत्रराशेः**
**भव्यं गभीरमधुरं फणति स्म भाष्यम् ।।६४।।**

---

ये मन्दाधिकारिणः आत्मविद्याग्रहणे, सगुणब्रह्मभावन एव एकान्तेन सक्ताः तेषां सगुणब्रह्मभावनामुखेन क्रमेण निर्गुणब्रह्मावगतये उपकारिणीः सत्यं ज्ञानमनन्तमिति गोविन्दाष्टक प्रभृतीः स्तुतीः व्यतानीत् विस्तृतान् चकार ।।६०।।

मध्यमाधिकारिणां कृते सर्ववेदान्तसिद्धान्तसारसंग्रहादीन्, अन्ते उत्तमाधिकारिणां कृते उपनिषदां भाष्यमारचितवान् । उदितोदितैः एवमेवमित्युपदेशेन अलंभावानापत्त्या पुनः पुनरुपदिष्टैः ।।६१।।

तीर्थो गुरुः, तेन दीव्यन्ति क्रीडन्ते मोदन्ते इति तैर्थिकाः शिष्याः । तीर्थं पुण्यक्षेत्रं, तीर्थभूतौ पादौ यस्य । शिष्यस्य गुरुचरणावेव तीर्थं न गङ्गा न काशी ।।६३।।

भव्यं मङ्गलात्मकं, मङ्गलं मङ्गलानां चेति प्रथितं भगवन्नाम

**विद्वद्भिः शुकमुनितातसूत्रपङ्क्तेः**
**व्याकुर्वन्नुपनिषदाञ्च भाष्यमेषः ।**
**ब्रह्मर्षिव्रजबहुमानितो बदर्यां**
**सानन्दं रुचिरमुवास शङ्करार्यः ॥६५॥**

इति दन्तिद्योतिदिवाप्रदोपाङ्क–सत्यमङ्गलरत्नखेटश्रीनिवासदीक्षित-तनूजस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरगुरुचरण सहजता लब्धविद्यावैशद्यस्य राजचूडामणिदीक्षितस्य कृतिषु शङ्कराभ्युदये काव्ये प्रथमः सर्गः ।

---

प्रथमं मङ्गलादितया व्याख्याय, मध्ये मङ्गलात्मक स्तोत्रप्रकरणादीन्, अन्ते मङ्गलान्तत्वेन सूत्रभाष्यं चकार । एवं मङ्गलादीनि मंगलमध्यानि मङ्गलान्तानि च तदीयग्रन्थरत्नानि प्रथन्ते । बदर्यां सूत्रभाष्यप्रणयन, काश्यामितरग्रन्थजातप्रणयनमिति काचित् प्रसिद्धिः ६४॥

शुकमुनितातो व्यासः । तदीयायाः सूत्रपंक्तेः उपनिषदां च भाष्यं व्याकुर्वन् विद्वद्भ्यः शिष्येभ्यः विशदतया अध्यापयन्, विद्वद्भिः सह शास्त्रार्थविचारं कुर्वाणः, ब्रह्मर्षिव्रजेन बहुमानितः बदर्यां सानन्दमुवास ॥ 'शङ्करो दर्शयामास गुरू ग्रन्थसमुच्चयम् । गौडपादोऽभवत्प्रीतः प्रशिष्ये विनयोज्ज्वले । लोकशंकरणे शक्तं चिकीर्षुस्तं जगद्गुरुम् । त्रिकालविदलंचक्रे भगवत्पादसंज्ञया । बदरीवासिनस्सव भगवत्पादयोगिनम् । शङ्कराचार्यनाम्ना च तुष्टुवुर्भक्तिपूर्वकम् ।' इति ब्रह्मानन्दीयशङ्करविजये ॥६५॥

# द्वितीयः सर्गः

व्यासानुग्रहः

**तत्रैकदा नवतमालसमानशोभं**
**चामीकरव्रततिचारुजटाकलापम् ।**
**विद्युल्लतावलयवेल्लितवारिवाह-**
**सच्छायमैक्षत सत्यवतीतनूजम् ॥१॥**

**भद्रैणचर्मपरिवीतकटीतटीकं**
**नीलाम्बुदावृतनितम्बमिवाञ्जनाद्रिम् ।**
**आलोलफेनधवलत्रिगुणोपवीतं**
**आलक्षितत्रिपथगोर्मिमिवाभ्रमार्गम् ॥२॥**

---

इतिवृत्तक्रमे, पौर्वापर्यं ग्रन्थेषु बहुधा उपलभ्यते । एकैकस्मिन्नितिवृत्तेऽपि ऐतिह्यं मिथो भिद्यते । व्याससमागमो द्वेधा वर्ण्यते । व्यासो गृहीतवृद्धद्विजरूपः गङ्गातीरे शिष्यानध्यापयन्तं आचार्यमुपसृत्य "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां" इति तृतीयाध्यायगतं सूत्रमधिकृत्य वादमारभत । दिनाष्टकं प्रवृत्ते वादेऽशान्ते शङ्करः पद्मपादसूचितं द्विजरूपं व्यासमवगत्य प्रणनाम, व्यासश्च तमनुजग्राहेति आनन्दगिरीये माधवीये चिद्विलासीये सदानन्दीये भगवत्पादाभ्युदये च । व्यासः शङ्करं द्रष्टुं साक्षादागच्छत् अन्वगृह्णाच्चेति व्यासाचलीये गुरुवंशकाव्ये गोविन्दनाथीये शङ्कराभ्युदये च । व्यासेनैव दीर्घायुष्ट्वं अनुगृहीतमिति व्यासाचलीय–माधवीय–सदानन्दीय–शङ्कराभ्युदय–गुरुवंशकाव्येषु, व्यासध्यातेन तत्र सन्निहितेन ब्रह्मणा अनुगृहीतमिति प्राचीनशङ्करविजय–आनन्दगिरीय–चिद्विलासीय – जगद्गुरुरत्नमालास्तोत्रेषु ॥ तमालनीलं वपुः, स्वर्णच्छाया जटेति विद्युदलंकृतो मेघ इव भाति व्यासः ॥१॥

भद्रमेणचर्म नीलाम्बुद इव, भगवान्व्यासोऽञ्जनाद्रिरिव । आलोलं फेनधवलं च उपवीतं श्यामे अभ्रमार्गे दिवंगतायाः गङ्गायाः ऊर्मिमालेव ॥२॥

गाढोपगूढमनुरागजुषा रजन्या
गर्हापदं विदधतं शरदिन्दुबिम्बम् ।
तापिञ्छरीतितनुकान्तिझरीपरीतं
कान्तेन्दुकान्तघटितं कलशं दधानम् ॥३॥

सप्ताधिकाञ्छतरविंशतिमौक्तिकाढ्यां
सत्वस्य मूर्तिमिव बिभ्रतमक्षमालाम् ।
तत्तादृशस्वपतिवंशविवृद्धये प्राक्
तारावलीमुपगतामिव चानुनेतुम् ॥४॥

द्वीपे क्वचित्समुदयन् द्रुतमेधमानः
शाखासहस्रसचिवशुकसेव्यमानः ।
उल्लासयत्यहह यस्तिलको मुनीनां
उच्चैः फलानि सुदृशां निजपादभाजाम् ॥५॥

श्रीशङ्करोऽथ सह शिष्यगणेन दूरात्
प्रत्युद्गतः पदसरोरुहयोः प्रणम्य ।

---

व्यासमुनेर्हस्ते चन्द्रकान्तशिलाघटितः कलशः । चन्द्रिकाधवलं कलशं व्यासतनुगतो नीलिमा पर्येति । रजनी कामिनी चन्द्रमुपगूहते । तथोपगूढः चन्द्रः व्यासधृतकलशं दृष्ट्वा आत्मानं गर्हत इव ॥३॥

व्यासो बिभर्ति सप्तविंशतिमुक्ताघटिताक्षमालां, चन्द्रवंशाभिवृद्धये तारागणो व्यासमुपास्त इव । व्यासेन किल कुरुवंशाभिवृद्धिः ॥४॥

वेदशाखासहस्रं सचिवा यस्य । तिलको नाम कश्चिद्वनस्पतिः । अयं व्यासाख्यः तिलकवृक्षः क्वचित् (द्वीपे) जातः, जन्मभूमेः अन्यत्र द्रुतं एधमानः शाखासहस्रसहायः सद्यः क्षणाद्वृद्धः । वेदशाखासहस्रं सहायभूतमस्य । शुकैः फलास्वादशीलैः – शुकेन महर्षिणा सुतेन सेव्यमानः । सुदृशां ज्ञानिनां निजपादभाजां अर्थे उच्चैः फलानि कांक्षिताधिकरसानि उल्लासयति सद्यः स्वाद्यत्वेन प्रकटयति ॥५॥



ऊचे मुनीश्वरमुदारमुखारविन्द-
माध्वीकसारमतिदायिपुराणजातम् ॥६॥

धत्से घनार्तिशमनाय हृदा गिरीशं
गोपायसेऽधिवदनं च चिरन्तनीर्गाः ।
दूरीकरोषि नरकं च दयार्द्रदृष्ट्या
कस्ते गुणान्वदितुमद्भुतकृष्ण शक्तः ॥७॥

अद्यानवद्यमजनिष्ट जनुर्ममेदं
अद्यैव मे सुचरितानि पचेलिमानि ।
पादारविन्दभजनात्तव देशिकेन्द्रे-
त्युक्त्वाग्रतो निविविशे स इदंनिदेशात् ॥८॥

अव्याजकन्दलदमन्ददयारसाभिः
आशीर्भिरेनमभिनन्द्य स शङ्करार्यम् ।
वाचंयमेन्द्रुरथ वाचमुवाच वाणी-
वीणाकलक्वणतृणीकरणप्रवीणम् ॥९॥

---

उदारं मुनीश्वरमुखं वेदपाठपरिपूतत्वेन वेदरक्षकत्वेन च । तन्मुखारविन्दगलितो मकरन्दः पुराणजातम् । अरविन्दापेक्षया मकरन्दोऽल्पिष्ठः लोके । अत्र तु बहुविस्तृतं वेदोपबृम्हकत्वान्महत् पुराणजातमिति तदप्युदारमेव ॥६॥

व्यासोऽपि कृष्णः । परमद्भुतः । हृदये शिवं दधानः, वाचि वेदान् गोपायन्, दृष्ट्या नरकबाधां दूरीकरोतीत्यद्भुतत्वम् ॥७॥

इदंनिदेशात् - अस्य व्यासस्य निदेशात् अनुज्ञां प्राप्य निविविशे उपविवेश ॥८॥

वाचो भाषणात् यच्छति विरमयतीति वाचंयमो मुनिः । अव्याजेन

दोषानुषंगकलयापि सुदूरमुक्ताः
धत्सेऽधिमानसमहो सकलाः कलाश्च ।
सर्वात्मना गिरिजयोपहितस्वरूपः
शक्यो न वर्णयितुमद्भुतशङ्करस्त्वम् ॥१०॥

भावं मदीयमवबुध्य यथावदेवं
भाष्यं प्रणेतुमनलं भगवानपीशः ।
आकर्ण्य सिद्धमुखतो हरसन्निधौ तत्
आद्यन्तमागममिह त्वदवेक्षणाय ॥११॥

अष्टौ वयांसि विभुना तव वत्स दत्ता-
न्यन्यानि चाष्ट भवता सुधियार्जितानि ।
भूयोऽपि षोडश भवन्तु भवाज्ञया ते
भूयाच्च भाष्यमिदमारविचन्द्रतारम् ॥१२॥

इत्थं निगद्य ऋषिवृष्णि तिरोहितेऽस्मिन्
अन्तर्विवेकनिधिरप्यथ विव्यथे सः ।
हृत्तापहारिनिरुपाधिकृपारसानां
तत्तादृशां कथमहो विरहो विषह्यः ॥१३॥

---

स्वरसतः कन्दलत् अंकुरयन् अमन्दः अधिकः दयारसः यासु ताभि-राशीर्भिः, कन्दलो नवांकुरः ॥९॥

अद्भुतकरुणः भगवत्पादान् अद्भुतशंकर इत्याह्वयति । सुदूरमुक्ताः अत्यन्तमसंस्पृष्टाः ॥१०॥

भक्तहृदयानुसारिणी भगवत आज्ञा । भवेन दत्तानि अष्टौ वयांसि । सन्यासं स्वीकृतवता सुधिया पुनरष्टावार्जितानि । अद्य भव आज्ञापयति मन्मुखेन भूयोऽपि षोडश वयांसि भवन्त्विति ॥१२॥



## सनन्दनस्य शिष्यतया स्वीकारः

सह्यात्मजातटभवोऽखिलतीर्थसेवा-
सक्तस्सनन्दसदृशोऽथ सनन्दनाख्यः ।
वन्दारुसंसृतिमहार्णवकर्णधारं
वर्णी चिरन्तनवचोऽन्तगुरुं ववन्दे ॥१४॥

संसारघोरजलधेस्तरणाय शश्वत्
सांयात्रिकीभवनमर्थयमानमेनम् ।
हन्तोत्तमाश्रमतरीमधिरोप्य पारं
निन्ये निपातितदयारसकेनिपातः ॥१५॥

अद्वन्द्वभक्तिममुमात्मपदारविन्द-
द्वन्द्वे नितान्तदयमानमना मुनीन्द्रः ।
आम्नायशेखररहस्यनिधानकोशं
आत्मीयकोशमखिलं त्रिरपाठयत्तम् ॥१६॥

ईर्ष्याभराकुलहृदामितराश्रमाणां
प्रख्यापयन्ननुपमामदसीयभक्तिम् ।

---

कावेरीतीरजातस्य तीर्थान्तरसेवासक्तिः नैसर्गिकी । सनन्दः चतुस्सनेष्वन्यतमः । तत्सदृशोऽयम् । वन्दारुरभिवादकः ॥१४॥

सांयात्रिकः पोतवणिक् यो नावा जलधिं तारयति । उत्तमाश्रमः संन्यास एव तरी नौः । केनिपातः नौचालको दारुखण्डः दयैव केनिपातः ॥१५॥

आत्मीयः कोशः स्वकृतग्रन्थजातम् । त्रिः पाठनं संशयविपर्यास-रहितस्य सम्यग्ग्रहणाय ॥१६॥

अभ्रापगापरतटस्थममुं कदाचित्
आकारयन्निगमशेखरदेशिकेन्द्रः ॥१७॥

सन्तारिकाऽनवधिसंसृतिसागरस्य
किं तारयेन्न सरितं गुरुपादभक्तिः ।
इत्यञ्जसा प्रविशतः स्वमियं द्युसिन्धुः
पद्मान्युदश्वयति तस्य पदे पदे स्म ॥१८॥

पाथोरुहेषु विनिवेश्य पदं क्रमेण
प्राप्तोपकण्ठममुमप्रतिमानभक्तिम् ।
आनन्दविस्मितनिरन्तरितान्तरोऽसौ
आश्लिष्य पद्मपदनामपदं व्यतानीत् ॥१९॥

कुमारिलभट्टसमागमः

भाष्यस्य वार्तिकमथैष कुमारिलेन
भट्टेन कारयितुमादरवान्मुनीन्दुः ।
वन्ध्यायमानमदविन्ध्यमहीधरेण
वाचंयमेन चरितां हरितं प्रतस्थे ॥२०॥

---

आश्रवः – गुरुवाक्यानतिलंघी शिष्यः । 'आश्रवो वचने स्थितः' ॥१७॥

द्युसिन्धुः गंगा । अञ्जसा शीघ्रं, स्वं स्वीयं प्रवाहं, उदश्वयति स्म धारकत्वेन उदगमयत् ॥१८॥

शबरसूत्रभाष्यकर्ता कुमारिलभट्टः ललितभावभरितव्याख्याकारित्वेन प्रथितः । अगस्त्यशिष्यो विन्ध्यः, महामेरुणा अस्पर्धत मत्तः, गुरुणा निवारितः स्वीयं मदं वन्ध्यं व्यर्थमिवाकरोत् । अगस्त्यचरिता हरित् दिग्दक्षिणा ॥२०॥



आमज्जतां किल तनूमसितां सितां च
कर्तुं कलिन्दसुतया कलितानुषङ्गाम् ।
अह्नाय जह्नुतनयामथ निह्नुताघां
सध्येप्रयागमनयन्मुनिरक्षिमार्गम् ॥२१॥

अन्तेवसद्भिरमलच्छविसंप्रदायं
अध्येतुमाश्रितजला कुहचिन्मरालैः ।
चक्रद्वयेन रजनौ सहवाससौख्य-
संशीलनाय किल संवलिताऽपरत्र ॥२२॥

क्षोणीसरोरुहदृशः कुचकुंभसीम्नि
कस्तूरिकाबहुलकर्दममेचकान्ता ।
आबद्धरेखसितपक्षतिचित्रिता या
भव्योत्तरीयकदुकूलपटीव भाति ॥२३॥

---

प्रयागे गंगा यमुनया संगच्छते । गंगा शिवप्रिया, यमुना विष्णुप्रिया । प्रयागादन्यत्र गंगा स्वपूरे आमज्जतः शिवरूपान् करोति, यमुना च विष्णुरूपान्, अत्र तु उभे मिलिते हरिहररूपान् कुरुतः, सिता तनूः शिवस्य, असिता विष्णोः । अह्नाय शीघ्रेण ॥२१॥

गंगायाः शुक्लवर्णत्वेन सत्वाकारतया अमलच्छविसंप्रदायः सात्विको प्रवृत्तिरधीयते मरालैः । यमुनायाः कृष्णवर्णत्वेन तमोरूपतया तत्र तमोरूपरात्रिसहवाससुखमधीयते चक्रयुगलेन ॥२२॥

क्षोणी भूमिः सा काचित्सुभ्रूरिव । तस्याः कुचकुम्भसीम्नि उत्तरीयकदुकूलपटीव यमुनायुतगंगा भाति । सा पटी यस्याः कस्तूरिकाबहुलकर्दमेन मेचकः नीलोऽन्तः प्रान्तप्रदेशः, यमुनाया इदं लक्षणम् । आबद्धरेखाभिः रेखाबद्धाभिः सिताभिः श्वेतवर्णाभिः पक्षतिभिः पक्षमूलैः चित्रिता भव्या च । इदं गंगायाः लक्षणम् ॥२३॥

अज्ञातसम्भवतिरोधिकथापि वाणी
यस्याः सितासिततयैव गृणाति रूपम् ।
भागीरथीं यमुनया परिचीयमानां
एनां विगाह्य मुदितो मुनिरित्यभाणीत् ॥२४॥

सिद्धापगे पुरविरोधिजटोपरोध-
क्रुद्धा कुतश्शतमदस्सदृशान् विधत्से ।
बद्धा न किन्नु भवितासि जटाभिरेषां
अद्धा जडप्रकृतयो न विदन्ति भावि ॥२५॥

सन्मार्गवर्तनपरापि सुरापगे त्वं
अस्थीन्यवश्यमशुचीनि किमाददासि ।
आः ज्ञातमम्ब हृदयं तव सज्जनानां
प्रायः प्रसाधनकृते कृतमज्जनानाम् ॥२६॥

त्वं ताम्रपर्ण्यपि सुधाशधुने जलानां
मुक्तात्मना परिणतौ परमं निदानम् ।

---

अज्ञातसंभवतिरोधिकथा उत्पत्तिविनाशरहिता नित्या वाणी वेदः । "सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतन्ति" इति श्रुतिः । (ऋग्वेदखिले ८-३-६) ॥२४॥

सिद्धापगे देवनदि ! पुरविरोधिना शिवेन जटासु निरोधात् क्रुद्धा त्वं कृत्याकृत्यं न जानीषे । यतः आमज्जतः सर्वान् शिवरूपान् विधत्से, यतः तेषां जटासु शतशस्तव बन्धो भविता । डलयोरभेदात् जलप्रकृतिस्त्वं जडप्रकृतिरसि ॥२५॥

शिष्टैः अस्थीन्यस्पृश्यानि । परं त्वं अवश्यं तान्याददासि । अस्थ्नामावश्यकता तव तादृशी, आमज्जतां शिवरूपेण बहिरागच्छतां सतामाभूषणाय ॥२६॥



भेदोऽयमत्र भवती समयानपेक्षा
सा स्वातिवृष्टिसमयं समवेक्षमाणा ॥२७॥

अम्ब त्वमम्बरपथे बहुलक्षपासु
चान्द्रीः कला हरसि नैव चरन्त्यमर्त्याः ।
नो चेत्कुतः प्रतिनवान्नयनायुधांस्तान्
स्यात्ते प्रसाधयितुमिन्दुकलासहस्रम् ॥२८॥

स्वापानुषङ्गजडताभरितान् जनौघान्
स्वापानुषङ्गजडताविधुरान् विधत्से ।
दूरीभवद्विषयरागहृदोऽपि तूर्णं
धूर्तावतंसयसि देवि क एष मार्गः ॥२९॥

सद्यः शिरः समधिरोहसि मानिता चेत्
व्याकुर्वती किल लघुप्रकृतेः स्वभावम् ।

---

मुक्ताः मौक्तिकानि ज्ञानिनश्च । जलानां मौक्तिकात्मना परिणतिस्ताम्रपर्ण्यां, जडानां अज्ञानां ज्ञानित्वेन परिणतिरत्र । जलानामित्यत्र लडयोरभेदः । स्वातीनक्षत्रे वृष्टौ मुक्तोत्पत्तिः ॥२७॥

बहुलक्षपाः कृष्णपक्षरात्रयः । तासु चन्द्रकलास्त्वमेव अपहरसि । देवाः कृष्णपक्षे चन्द्रकलाः चरन्ति भक्षयन्तीति तु मृषैव । प्रतिक्षणं त्वय्यामज्जनोत्तरक्षण एव नवनवाः नयनायुधाः शिवाः सहस्रश उत्पद्यन्ते । तृतीयं नयनं दाहकमिति तदेवायुधं शिवस्येति नयनायुधः सः । तेषामेकैकशः प्रसाधनाय इन्दुकलासहस्रं अपेक्ष्यते, इति त्वमेव चन्द्रकला हरसि । न देवाः हरन्ति ॥२८॥

स्वापो निद्रा तमःप्रभवा यदनुषङ्गेण जडताभरितो जनौघः । स्वकीयेन अपां समूहेन (स्वीयाः आपः स्वापं) जडताया मुक्तान् विधत्से । धूर्तो धत्तूरः खलजनश्च । धत्तूरावतंसः शिवः । विषयेभ्यो दूरीभवतः सतः धूर्तावतंसान् शिवरूपान्, खलजनाग्रगण्यान् आतनोषीति विरोधाभासः ॥२९॥

दत्से त्वदाश्रितवतां द्रुतमर्धचन्द्रं
जह्नोः कुमारि जडतां च विवृण्वती त्वम् ॥३०॥

इत्यालपन्नथ तुषानलदह्यमान-
देहं गुरून्मथनदोषभरापनुत्त्यै ।
मौनी स तीरभुवि मण्डनमुख्यशिष्यैः
आरादुपासितमलोकत भट्टपादम् ॥३१॥

दूरे विधूतदुरितौघमपाङ्गभङ्ग्या
तं देशिकं तदनु नेत्रपथावतीर्णम् ।
तेजोविशेषपरिबुद्धतदीयतत्त्वो
वाचा हृदा च विनतो वदति स्म भट्टः ॥३२॥

जाने भवन्तमहमार्य निजार्धजानिं
अद्वैतरक्षणकृते विहितावतारम् ।
प्रागेव चेन्नयनसद्म कृतार्थयेथाः
पापक्षयाय बत नेदृशमाचरिष्यम् ॥३३॥

---

लघुप्रकृतयः अल्पस्वभावा जनाः मानिता गर्वं प्राप्नुवन्ति, सद्यो मानयितुः शिरोऽधिरोहन्ति । तद्वत् पुण्यतीर्थमिति त्वयि संमानेन स्नातवतां शिवरूपं प्राप्तवतां गंगाधरतासिद्ध्यै तेषां शिरोऽधिरोहसि । जडा आश्रितानां अर्धचन्द्रं गलहस्तिकां ददन्ति निस्सारणाय । त्वमपि त्वामाश्रितानां पारमेश्वरसारूप्यसंपादकं अर्धचन्द्रं ददासि । गलहस्तिका गले हस्तं दत्त्वा निस्सारणम् ॥३०॥

आलपन् गंगया साक्षात् आभाषमाणः । गुरून्मथनं गुरुहिंसा ॥३१॥

तुषानलेन बहिः स्वीयपापचरितेन अन्तश्च दह्यमानो भट्टपादः भगवत्पादकटाक्षपातेन विधूतपापतया प्रथममन्तस्तापं जहौ, साक्षात् दर्शनेन बहिस्तापञ्च ॥३२॥

ईदृशं - प्रायश्चित्तार्थत्वेऽपि शरीरनाशार्थकत्वादकरणीयम् ॥३३॥



बाह्यं मतं निरसितुं सुगतादधीत्य
बाल्यात्तमेव समघातयमार्य जित्वा ।
ईशं निरास्थमपि च स्वत एव वेदा
मानं न तत्कृततयेतिमताभिमानात् ॥३४॥

प्रायोऽधुना तदुभयप्रभवाघशान्त्यै
प्राविक्षमार्य तुषपावकमात्तदीक्षः ।
भाग्यं न मेऽप्यजनि शाबरभाष्यवस्त्व-
द्भाष्येऽपि किञ्चन विलिख्य यशोऽधिगन्तुम् ॥३५॥

इत्यूचिवांसमथ भट्टकुमारिलं तं
ईषद्विकस्वरमुखांबुजमाह मौनी ।
श्रुत्युक्तकर्मविमुखान् सुगतान्निहन्तुं
जाने भवन्तमिह जातमहं गुहन्तु ॥३६॥

सम्भावनापि भवतो न हि पातकस्य
सत्यं व्रतं चरसि सज्जनशिक्षणाय ।
उज्जीवयामि करकांबुकणोक्षणेन
भाष्येऽपि मे कलय वार्तिकमङ्ग भव्यम् ॥३७॥

---

बाह्यं वेदबाह्यम् । वेदाः स्वतः प्रमाणभूताः नित्या अकर्तृकाः । परमेश्वरः सर्वज्ञतमः परमाप्तोऽपि वेदानां न कर्ता । यदि कश्चित्कर्ताऽभविष्यत् भ्रमप्रमादादिवक्तृदोषाः तत्र प्रसक्ता अभविष्यन् । ततोऽपि ईश्वरो नापेक्ष्यते । कर्म साक्षात्फलं ददाति । अतोऽपि ईश्वरो नापेक्ष्यते । इति मीमांसकमताभिमानात् ईश्वरं निरास्थं निरस्तवान् ॥

गुरुद्रोहः ईश्वरनिन्दा इति पापद्वयम् ॥३५॥

करकः कमण्डलुः ॥३७॥

प्रत्युत्तरं व्यधित भट्टगुरुर्मुनीन्दो
मय्यल्पकेऽपि महिमोक्तिरियं तवार्हा ।
आजानतोऽत्र कुटिलेऽपि जने महान्तः
त्वारोपयन्ति हि गुणं धनुषीव शूराः ॥३८॥

सञ्जीवनाय चिरकालमृतस्य च त्वं
शक्तोऽसि शङ्कर दयोर्मिकटाक्षपातैः ।
आरब्धमेतदधुना व्रतमागमोक्तं
मुञ्चन् सतां न भवितास्मि मुधा विनिन्द्यः ॥३९॥

चार्वाकदर्शनविधानसरोषधातृ-
शापेन संप्रति शतक्रतुदेशिकेन्द्रः ।
विद्योतते मगधसीमनि विश्वरूप-
नामा समस्तनयसागरपारदृश्वा ॥४०॥

अम्बेक इत्यभिहितस्य हि तस्य लोकैः
अम्बेति बान्धवजनैरभिधीयमाना ।
शप्ता सरोरुहभवेन सरस्वती सा
जाता वधूरुभयभारतिकाभिधाना ॥४१॥

सर्वासु शास्त्रसरणीषु स विश्वरूपो
मत्तोऽधिकः प्रियतमश्च ममाश्रवेषु ।
तत्प्रेयसीं शमधनेन्द्र विधाय साक्ष्ये
वादे विजित्य तमिमं वशगं विधेहि ॥४२॥

---

गुणो मौर्वी धार्मिकत्वादिर्गुणश्च ॥३८॥

अंबेकः अंबेति विश्वरूपस्य उभयभारत्याश्च लोकेऽभिधानम् ।
उंवेकः उंवेति पाठः, तत् प्राकृतं नामेति माधवीयव्याख्यायाम् ॥४२॥



तेनैव तावकक्वतिष्वपि वार्तिकानि
कर्मन्दिवर्यतम कारय मा विलम्बः ।
त्वं विश्वनाथ इव मे समये समागाः
तत्तारकं समुपदिश्य कृतार्थयेथाः ॥४३॥

इत्यूचिवांसमिममृद्धसुखप्रकाशं
ब्रह्मोपदिश्य बहिरन्तरपास्तमोहम् ।
तन्वन्दयानिधिरसौ तरसाभ्रमार्ग-
मार्गादवाप विषयान्मगधाभिधानान् ॥४४॥

आराध्य साम्बशिवमाहितवैश्वदेवः
पश्यन्नथातिथिजनान्परितो दिशासु ।
त्र्यय्यन्तदेशिकममुं त्रिदशाध्वनाऽसौ
अभ्यर्णमागतमलोकत विश्वरूपः ॥४५॥

---

वाराणसीपुरपतिः कृपया अत्र सन्निहितः इव तारकं ब्रह्मोपदेष्टुम् ॥

ऋद्धः समृद्धः पूर्णः सुखप्रकाशः आत्मानन्दानुभवः तद्रूपं ब्रह्म उपदिश्य, तेनोपदेशेन संसारमूलाज्ञानमोहनाशं तन्वन्, अभ्राणां मार्गोऽन्तरिक्षं तन्मार्गात् विहायसगत्या ॥४४॥

कथाक्रमोऽत्र द्वेधा । अतिथीन्प्रतीक्षमाणं विश्वरूपमुपगम्य शंकरो वादभिक्षां ययाचे । अभ्युपगते च वादे, भिक्षां स्वीचकार । ततः सपणबन्धं प्रवृत्ते वादे, जितो विश्वरूपः संन्यासमगृह्णात् । तत्पत्नी वाणी शापान्मुक्ता अन्तरधादिति शंकराभ्युदयगतः क्रमः, व्यासाचलीये गुरुवंशकाव्ये गोविन्दनाथीये चानुस्रियते । आनन्दगिरीयमाधवीयचिद्विलासीयादौ तु पैत्र्ये कर्मणि प्रवृत्तो विश्वरूपः । व्यासजैमिनी निमन्त्रितौ । मुद्रिते द्वारे शङ्करः गगनमार्गादन्तरवततार । क्रोधेनाध्यक्षिपद्विश्वरूपः शंकरम् । व्यासजैमिनी शमं उपादिशताम् । शङ्करेण प्रस्तुतां वादभिक्षां विश्वरूपः अङ्गीचकार । वादे जितः सः । उभय-

मन्थानशैलमथनश्रममन्तरेण
स्वैरं सुधारसमिव स्वरसोपपन्नम् ।
आकस्मिकं निधिमिवानवधिश्च जानन्
एनं सभाजयति ह स्म यतिप्रवीरम् ॥४६॥

भिक्षां प्रतिश्रुतवति प्रथमं स वाद-
भिक्षाप्रदानमथ, वाग्मिनि विश्वरूपे ।
स्वर्णाभसूपघृतपायसशर्करेक्षु-
रंभारसालपनसाढ्यमभुंक्त भैक्षम् ॥४७॥

जेतुः पराजित इहाश्रममाददीते-
त्येतौ मिथः कृतपणौ यतिविश्वरूपौ ।
अम्बामुदारधिषणामभिषिच्य साक्ष्ये
जल्पं वितेनतुरथो जयदत्तदृष्टी ॥४८॥

इत्थं तयोः कथयतोस्तु समक्षमेव
यातेषु षट्सु दिवसेष्वथ सप्तमेऽह्नि ।

---

भारत्या जयाय प्रवृत्तस्य शङ्करस्य परकायप्रवेशः, कामतन्त्रानुभवः, ततः परावृत्य उभयभारत्या जय इति क्रमः । विशेषस्तु श्रीशङ्कर-विजयमकरन्दे अस्मत्संकलिते द्रष्टव्यः ॥४५॥

विश्वरूपः शङ्करागमनेन सुधां प्राप्तां अमन्यत । सुधा तु मथनश्रम-लभ्या, इयं तु सुधा स्वैरं स्वेच्छया प्राप्ता स्वरसोपपन्ना चेति विशेषः ॥

प्रथमं भिक्षां, अथ ततः, वादभिक्षाप्रदानं प्रतिश्रुतवति विश्व-रूपे भैक्षमभुंक्त । ४७॥

अम्बां विश्वरूपपत्नीम् ॥४८॥



भिक्षार्थमुच्चलतमद्य युवामितीमौ
ऊचेऽप्यमुं पुनरुवाच यतीन्द्रमम्बा ॥४९॥

कोपातिरेकवशतश्शपता पुरा मां
शापावधिस्तव जयो विहितो विधात्रा ।
साऽहं यथाऽऽगतमुपैमि यतिप्रवीरे-
त्युक्त्वा तिरोधिमकृतोभयभारती सा ॥५०॥

संन्यासगृह्यविधिना सकलानि कर्मा-
ण्यह्नाय शङ्करगुरुर्विदुषोऽस्य कुर्वन् ।
कर्णे जगौ किमपि तत्त्वमसीति वाक्यं
कर्णेजपं निखिलसंसृतिदुःखहानेः ॥५१॥

भाष्ये विधत्स्व मम वत्स कृतिं गभीरां
इत्यूचिवांसमवदद्गुरुमेष नम्रः ।
क्वाहं क्व भाष्यमनघं तदथापि युष्मत्-
कारुण्यतः किमपि कर्तुमहं यतिष्ये ॥५२॥

कर्मैकतानमतिरेष कथं गुरो ते
विश्वासपात्रमभवद्बत विश्वरूपः ।
भाष्यस्य पद्मपद एव करोतु टीकां
इत्यूचिरे रहसि योगिवरं विधेयाः ॥५३॥

---

स्वभर्तुः पराजयं मध्यस्थरूपेण निश्चित्य, पराजितो जेतुराश्रमं स्वीकुर्यादिति पणनं चानुसृत्य, स्वभर्तारं संन्यासिनं सिद्धवत्कृत्य अद्य युवां भिक्षार्थं उच्चलतं उद्गच्छतं इति एकप्रकारेण उभावूचे ॥४९॥

तव जयः त्वत्कर्तृको जयः ॥५०॥

कर्णेजपं फलस्य प्रकाशनात्प्रागेव रहसि सूचकम् ॥५१॥

कर्मणि कर्ममार्गे एकताना अनन्यविषयतया प्रवृत्ता मतिर्यस्य ॥५३

शिष्योक्तिभिः शिथिलितात्ममनोरथोऽसौ
एनं स्वतन्त्रकृतिनिर्मितये न्ययुंक्त ।
नैष्कर्म्यसिद्धिमचिराद्विदधत्स चेद्ध-
न्यायामविन्दत सुरेश्वरदेशिकाख्याम् ॥५४॥

नैष्कर्म्यसिद्धिमथ तां निरवद्ययुक्ति
आद्यन्तहृद्यपदबन्धवतीमवेक्ष्य ।
आश्चर्यचित्रितमना भृशमार्यपादो
भूयो जगाद सुरपुङ्गवदेशिकेन्द्रम् ॥५५॥

श्लाघ्यं यजुश्श्रुतिशिरो मम, कण्वशाखा-
शीर्षं पुनस्तव, कुलागतवेदभावात् ।
तद्भाष्ययोस्तनु च वार्तिकमार्तिहारि
कीर्तिं च याहि जितकार्तिककौमुदीकाम् ॥५६॥

आज्ञा गुरोरनुचरैर्न हि लङ्घनीये-
त्युक्त्वा तयोर्निगमशेखरयोरुदग्रम् ।
निर्माय वार्तिकमसौ निजदेशिकाय
निस्सीमनिस्तुलनधीरुपदी चकार ॥५७॥

व्यासर्षिसूत्रचयभाष्यविवेचनाय
टीकाभिध विजयडिण्डिममात्मकीर्तेः ।

---

इद्धाः प्रकाशिता न्याया यया यस्यां वा तां नैष्कर्म्यसिद्धिम् ॥५४॥

कार्तिककौमुदी शरज्ज्योत्स्ना अतिस्वच्छेन्दुप्रकाशा मनोहरी । तामपि जितवत्यस्य कीर्तिः भूयादिति ॥५६॥

उपदा उपायनं उपहारः ॥५७॥



निर्माय पद्मचरणो निरवद्ययुक्ति-
बद्धं प्रबन्धमतनोद्गुरुदक्षिणां सः ॥५८॥

आलोचयन्नथ तदात्वगतिं ग्रहाणां
ऊचे गुरुस्सुरवरार्यमुपह्वरे सः ।
पञ्चैव वत्स चरणाः प्रथिता इह स्युः
तत्रापि सूत्रयुगलद्वयमेव भूम्ना ॥५९॥

प्रारब्धकर्मपरिपाकवशात्पुनस्त्वं
वाचस्पतित्वमधिगत्य वसुन्धरायाम् ।
भव्यां विधास्यसि समां मम भाष्यटीकां
आभूतसंप्लवमधिक्षिति सा च जीयात् ॥६०॥

निखिलनिगमचूडाचिन्तया हन्त यावत्-
स्वपनमधिकसौख्यं निर्विशन् निर्विशङ्कम् ।
बहुतिथमभितोऽसौ नर्मदां नर्मदां तां
मगधभुवि निवासं निर्ममे निर्ममेन्द्रः ॥६१॥

इति दन्तिद्योतिदिवाप्रदीपाङ्क—सत्यमङ्गलरत्नखेटश्रीनिवासदीक्षित-
तनूजस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारीश्वरगुरुचरण सहजता-
लब्धविद्यावैशद्यस्य राजचूडामणिदीक्षितस्य कृतिषु
शङ्कराभ्युदये काव्ये द्वितीयः सर्गः ।

---

सूत्रयुगलद्वयं चतुःसूत्री ॥५९॥

वाचस्पतिमिश्रो भामतीकारः प्रसिद्धः सुरेश्वरावतारतया । अधिक्षिति क्षितौ ॥६०॥

यावत्स्वपनं, रात्रौ निद्रागमनपर्यन्तं वेदान्तविचारेण अधिकसौख्यं वेदान्तविचाराभिव्यक्तं स्वरूपसुखं निर्विशन् भुञ्जानः । निर्ममाणां यतीनामिन्द्रः । बहूनां तिथीनां पूरणः कालो बहुतिथः, तं कालं, मगधभुवि वासं निर्ममे ॥६१॥

# तृतीय: सर्ग:

## जनन्या: अन्त्येष्टिविधानम्

अथ कालटिनामकाग्रहारे जननी हन्त जरातुरा नितान्तम् ।
मुरवैरिपुरोन्मुखी मुनीन्दुं मुहुराधत्त मनोरथाध्वनीनम् ॥१॥

अधिगत्य तदात्मयोगशक्तेरनुभावेन निवेद्य चाश्रितेभ्य: ।
अवलम्बिततारकापथोऽसावचिरादन्तिकमाससाद मातु: ॥२॥

परिपक्त्रिमभक्तिरेष मातु: पदपाथोजरजोऽधिमौलि तन्वन् ।
समुपादिशदद्वयात्मतत्वं स्वयमस्थूलमनण्वगोत्रवर्णम् ॥३॥

मनुते मम निर्गुणं मनो मे सगुणं ब्रह्म समीरयेति मात्रा ।
गदितो गदति स्म भक्तिगम्यं गरुडारूढमजं गदाग्रजं स: ॥४॥

भुजगाधिपभोगतल्पभाजं कमलाङ्कस्थलकल्पितांघ्रिपद्मम् ।
अभिवीजितमादरेण नीळावसुधाभ्यां वलमानचामराभ्याम् ॥५

मुरवैरिपुरं वैकुण्ठलोक: तत्र गमनाय उन्मुखी शरीरं जिहासती । मनोरथस्य अभिलाषस्य अध्वानमलं असकृत् गच्छतीति अध्वनीन: । जरातुरा स्वनिकटे पुत्रस्थितिं अकांक्षत ॥१॥

तारकापथो व्योममार्ग: ॥२॥

परिपाकेन निर्वृत्ता पूर्णतामुपयाता भक्ति: यस्य ॥३॥

निर्गुणब्रह्मानुसन्धानं असकृन्मम मन: करोत्येव । परं सगुणे रुचि-रिदानीमिति तस्य मनसि धारणाय मे मह्यं तत्समीरय कथय । गदो वेद:, तस्यापि पूर्वमासीदिति गदाग्रज: । वसुदेवात् देवरक्षितायां जात: गद:, तत्पूर्वभव: कृष्णोऽपि गदाग्रज: ॥४॥

विष्णुं वर्णयति दशभि: श्लोकै: ॥५॥



विहिताञ्जलिना निषेव्यमाणं विनतानन्दकृताऽग्रतो रथेन ।
धृतमूर्तिभिरस्त्रदेवताभि: परित: पञ्चभिरञ्चितोपकण्ठम् ॥६॥

महनीयतमालकोमलाङ्गं मकुटं रत्नमयं महार्घयन्तम् ।
शिशिरेतरभानुशीलिताग्रं हरिनीलोपलभूधरं हसन्तम् ॥७॥

मृगनाभिविशेषकेण तादृङ्मुखपाथोरुहषट्पदायितेन ।
कृतलाञ्छनफालबालचन्द्रं कचभारस्नुतकान्तिबिम्बभासा ॥८॥

शयनीयभुजङ्गफूत्क्रियाभि: सततं भंभमिति ध्वनन्तमुच्चै: ।
उपकण्ठमुपेत्य भिक्षमाणं निजकण्ठस्थरुचिं दरं दधानम् ॥९॥

शयनीयभुजङ्गनिर्विशेषै: सकलत्राणमहाध्वरैकयूपै: ।
चतुरोऽपि समं सतां पुमर्थान् किमु दातुं कलितं भुजैश्चतुर्भि: ॥

रथेन वाहनभूतेन विनतानन्दकृता गरुडेन । अस्त्रदेवता: शङ्ख-चक्रगदासिशार्ङ्गाख्यपञ्चायुधाभिमानिन्यो देवता: । अंचितोपकण्ठ: अलंकृतनिकटस्थल: ॥६॥

स्वसंपर्केण रत्नमकुटं महामूल्यं महनीयं कुर्वन्तं, नीलाचलं, भानुकरावभासितं हसन्तं परिहसन्तं, तत्सदृशम् ॥७॥

मुखपाथोरुहे मुखपद्मे तादृशि इदमित्थमिति निरूपयितुमशक्ये, षट्पदायितेन मृगनाभिविशेषकेण कस्तूरीतिलकेन कचभारात् कच-समूहात् स्नुतानां कान्तीनां बिम्बमिव भासमानेन मृगनाभिविशेषकेण कस्तूरीतिलकेन कृतं लाञ्छनं यस्मिन् स फालमेव बालचन्द्र: यस्य तम् ॥८॥

शंखो ध्वनति भंभमिति आदिशेषफूत्क्रियोत्थवातेन । शंखाभं भगवत: कण्ठं शंखो याचते तत्कान्तिम् ॥९॥

आदिशेषवत् दीर्घा: पीना: सुनिवृत्ता भुजा: ॥१०॥

स्थिरकौस्तुभरत्नदीपभाजा वनमालावलमानतोरणेन ।
कलशाम्बुधिकन्यकानिकेतीभवता भव्यतमं भुजान्तरेण ॥११॥

जठरस्थजगत्त्रयीजनौघभ्रमदोपान्तबुधव्रजानुबिम्बम् ।
मणिसारसनं महार्घयन्तं कमनीयेन सदा कटीतटेन ॥१२॥

शरदिन्दुमयूखचातुरीभिः चरणाम्भोजनखांशुकन्दलीभिः ।
अपरां नियतं भवाभिमानासहनां सौरतरङ्गिणीं सृजन्तम् ॥१३

अतिसीमदयापरैरपाङ्गैरतसीदामसखैरपास्तमोहम् ।
तुलसीदलभूषितं मुकुन्दं मनसीयं दधती मुमोच देहम् ॥१४॥

इयमर्चिरहर्वलक्षपक्षान् षडुदङ्मासममानिलार्कचन्द्रान् ।
चपलां वरुणेन्द्रधातृलोकान्क्रमशोऽतीत्य परं पदं प्रपेदे ॥१५॥

---

कलशांबुधिः क्षीरसमुद्रः, तस्य कन्यका लक्ष्मीः । अथवा कलशश्च अंबुधिश्च तयोः कन्यके तुलसी लक्ष्मीश्च । अमृतकलशगतसुधाकणादाविर्भूता तुलसीति स्कान्दे । तुलसी विष्णुप्रेयसी वक्षस्स्था च ॥११॥

मणिमयं सारसनं रशना कटिभूषणम् । स्वकटीतटे स्थितिदानेन तस्य महामूल्यतां संपादयति भगवान् । तस्मिन्सारसने निकटस्था बुधाः देवाः सात्वता वा प्रतिबिम्बभूता भान्ति । जठरस्थजगत्त्रयीजनौघभ्रमं तद्देवानुबिम्बं ददाति ॥१२॥

सुराणमियं तरंगिणी सौरतरंगिणी गङ्गा ॥१६॥

देवयानं ब्रह्मपथो देवपथ इति पुनरावृत्तिरहितः पन्था उपनिषत्सु कथ्यते । अर्चिरग्निः, अहर्दिनं, वलक्षपक्षः शुक्लपक्षः षडुदङ्मासाः उत्तरायणं, समः संवत्सरः, अनिलो वायुः अर्कः, चन्द्रः, चपला विद्युत् इति क्रमेण ऊर्ध्वगतौ अर्चिराद्यभिमानिदेवताः पूर्वपूर्वस्थानादुत्तरोत्तरस्थानं यापयन्ति पुरुषं, आतिवाहिकदेवता भूत्वा अतिवाहयन्ति । अतः परः अमानवः कश्चन वरुणेन्द्रधातृलोकानतिवाहयति ।



स्वयमेव चिकीर्षुरेष मातुश्चरमं कर्म समाजुहाव बन्धून् ।
किमिहास्ति यतेस्तवाधिकारः कितवेत्येनममी निनिन्दुरुच्चैः ॥

अनलं बहुधार्थिताऽपि तस्मै बत नादत्त च बन्धुता तदीया ।
अथ कोपपरीवृतान्तरोऽसावखिलां तामशपच्च निर्ममेन्द्रः ॥

करकांबुकणोक्षणेन मातुस्तनुमुत्थाप्य नयन् स दाहदेशम् ।
मनसा विहितेऽथ मन्त्रतस्तां ज्वलिते हन्त हुताशने जुहाव ॥

## महासुरालयेशगमनम्

विचरन्नथ केरलेषु विष्वङ्निजशिष्यागमनं निरीक्ष्य मौनी ।
विनयेन महासुरालयेशं विनमन्नस्तुत निस्तुलानुभावम् ॥१९॥

सदसत्त्वविमुक्तया प्रकृत्या चिदचिद्रूपमिदं जगद्विचित्रम् ।
कुरुषे जगदीश लीलया त्वं परिपूर्णस्य न हि प्रयोजनेच्छा ॥२०

रजसा सृजसीश सत्ववृत्तेस्त्रिजगद्रक्षसि तामसः क्षिणोषि ।
बहुधा परिकीर्त्यसे च स त्वं विधिवैकुण्ठशिवाभिधाभिरेकः ॥

---

आर्यांबा एवं अर्चिरादीन् क्रमशोऽतीत्य, आतिवाहिकदेवताभिरतिवाहिता परं पुनरावृत्तिरहितं पदं पदनीयं ब्रह्म प्रपेदे ॥१५॥

बन्धुता बन्धुसमूहः ॥१७॥

करकः कमण्डलुः । उत्थाप्य उद्गृह्य ॥१८॥

महासुरालयेशो महादेवालयेशो भगवान् शम्भुः ॥१९॥

सदसत्त्वाभ्यां विमुक्तया अनिर्वचनीयया प्रकृत्या मायया तदधिष्ठितया मूलप्रकृत्या । लीलामात्रं प्रभोः सृष्टिः । नान्यत्किंचित्प्रयोजनम् ॥

विविधेषु जलाशयेषु सोऽयं सवितेव प्रतिबिम्बितस्वभावः ।
बहुरूपमिदं प्रविश्य विश्वं स्वयमेकोऽपि भवान्विभात्यनेकः ॥

इति देवमभिष्टुवन्यतीन्द्रः स महाश्रीगुरुसम्मसन्निविष्टः ।
चिरकालवियोगदीनचित्तैः शिरसा शिष्यगणैरथो ववन्दे ॥२३॥

पञ्चपादिकानुवादेन पद्मपादस्य शोकापनयनम्

गुरुणा कुशलानुयोगपूर्वं सदयं शिष्यगणेषु सान्त्वितेषु ।
अनु दीनमनाः शनैरवादीदजहद्गद्गदिकं स पद्मपादः ॥२४॥

भगवन्नभिवन्द्य रङ्गनाथं पथि पद्माक्षमहं निवर्तमानः ।
बहुधा विहितानुनीतनीतो बत पूर्वाश्रममातुलेन गेहम् ॥२५॥

अहमस्य पुरा भिदावदेन्दोरपि पूर्वाश्रमवासनानुबन्धात् ।
अपठं भवदीयभाष्यटीकामजयं चात्र कृतानु(भि)योगमेनम् ॥

अथ गूढहृदो यथापुरं मामभिनन्द्याऽऽहितसत्क्रियस्य तस्य ।
अधिसद्म निधाय भाष्यटीकामहमस्वाप्समशङ्कितो निशायाम् ॥

---

तत्सृष्ट्वा तदेवानुप्राविशत् इति श्रुत्युक्तरीत्या सृष्टिं पूर्वमुक्त्वा अनुप्रवेशं विवृणोति सवितेवेति ॥२२॥

ववन्दे वन्दितोऽभूत् ॥२३॥

गद्गदिकं सगद्गदं भाषणं अजहत् अत्यजन् ॥२४॥

अनुनीतं अनुनयः ॥२५॥

भिदावदानां भेदवादिनां इन्दुः श्रेष्ठः । अनुयोगः प्रश्नः सन्देह-निवृत्त्यर्थकः, अभियोग इति पाठे आक्षेपोक्तिः ॥२६॥



युगपर्ययनृत्यदुग्रफालज्वलनज्वालकरालकीलजालः ।
दहनोऽधिनिशीथमस्य धाम्ना बत टीकामपि भस्मसादकार्षीत् ॥

अदहत्स्वगृहं स्वयं हताशो विमतग्रन्थमसौ विमृग्नुकामः ।
मतिमान्द्यकरं गरं च भैक्ष्ये व्यधितास्येति विजृम्भते स्म वार्ता ॥

अधुना धिषणा यथापुरं नो विधुनाना चिरायं प्रसादमेति ।
विषमा पुनरीदृशी दशा नः किमु युक्ता भवदङ्घ्रिकिङ्कराणाम् ॥

इति वादिनमेनमार्यपादः करुणापूरकरम्बितान्तरङ्गः ।
अमृतोर्मिसखैरपास्तमोहैः वचनैः सान्त्वयति स्म वल्गुबन्धैः ॥

विषमो बत कर्मणां विपाको विषमोऽयमेष दुर्निवारः ।
विदितः प्रथमं ममायमर्थः कथितश्चाङ्ग सुरेन्द्रदेशिकाय ॥३२

मगधेषु मदीयसन्निधौ प्राक्पठिता या किल पञ्चपादिका सा ।
मनसो मम नापयाति शोको व्यपयातु त्वरितं लिखेत्यवादीत् ॥

प्रसभं स विलिख्य पञ्चपादीं परमानन्दभरेण पद्मपादः ।
उदतिष्ठदतिष्ठदभ्यरोदीदुदगायद्धसति स्म नृत्यति स्म ॥३४॥

---

युगपर्ययो युगान्तः प्रलयकालः । उग्रः शिवः फालज्वलनः तृतीय-नेत्रभूतोऽग्निः । कीलो ज्वाला । धाम्ना गृहेण सह ॥२८॥

हृता कुत्सिता आशा यस्य सः अथवाभग्नमनोरथः । पद्मपाद-टीकाखण्डनं विधाय स्वाभिमतप्राभाकरमतं स्थापयानीति आशाया भग्नत्वात् । अस्य पद्मपादस्य स्वस्रेयस्यापि सतः भैक्ष्ये ॥२९॥

प्रसादं नो एति न प्राप्नोति ॥३०॥

करम्बितं मिश्रितं व्याप्तम् । वल्गुबन्धैः मञ्जुलपदयोजनैः ॥३१॥

### राजशेखरानुग्रहः

कविताकुशलोऽथ केरलक्ष्माकमनः कश्चन राजशेखराख्यः ।
मुनिवर्यममुं मुदा वितेने निजकोटीरनिघृष्टपन्नखाग्रम् ॥३५॥

प्रथते किमु नाटकत्रयी सेत्यमुना संयमिना ततोऽनुयुक्तः ।
अयमुत्तरमाददे प्रमादादनले साऽऽहुतितामुपागतेति ॥३६॥

मुखतः पठितां मुनीन्दुना तां विलिखन्नेष विसिष्मियेऽथ भूपः ।
वद किं करवाणि किङ्करोऽहं वरदेति प्रणमन्व्यजिज्ञपच्च ॥

नृप कालटिनामकाकरस्था द्विजकर्मानधिकारिणोऽद्य शप्ताः ।
भवतापि तथैव ते विधेया बत पापा इति देशिकोऽशिषत्तम् ॥

### तोटकस्यानुग्रहः

अचिकित्स्यभगन्दराख्यरोगप्रसरच्छोणितपङ्किलां स्वशाटीम् ।
अजुगुप्समथो विशोधयन्तं कृपयाऽलोकत कञ्चिदाश्रवं सः ॥३९

अथ तोटकवृत्तपद्यजातैरयमज्ञातसुपर्वसूक्तिकोऽपि ।
दययैव गुरोस्त्रयीशिरोऽर्थं स्फुटयित्वाऽजनि तोटकार्यनामा ॥

---

क्ष्माकमनः भूपतिः। निजेन कोटीरेण निघृष्टानि पदयोर्नखाना-मग्राणि यस्य तम् ॥३५॥

सा प्रव्रजनात्पूर्वं कालट्यां श्रुता। भगवतः शङ्करस्य श्रुतधरत्वं आभ्यां सन्दर्भाभ्यां वर्ण्यते ॥३७॥

आकुर्वन्ति संघीभूय व्यवहरन्त्यत्रेति आकरः ग्रामः ॥३८॥

न विद्यते जुगुप्सा यस्मिन् कर्मणि तत्तथा ॥३९॥

सुपर्वसूक्तिः देववाणी संस्कृतभाषा ॥४०॥



### अश्विभ्यां भगन्दरचिकित्सा

**प्रथितैरवनौ परस्सहस्रैरगदङ्कारगणैरथाचिकित्स्ये ।**
**प्रबले सति हा भगन्दरेऽसौ स्मरति स्म स्मरशासनं मुनीन्द्रः ॥**

**स्मरशासनशासनान्मुनीन्दोरुपयातावुपकण्ठमश्विनौ द्वौ ।**
**अमृतद्रवसेचनाद्व्यधत्तामगदङ्कारवचो निजं यथार्थम् ॥४२॥**

### हस्तामलकस्य शिष्यतया स्वीकरणम्

शिववल्ल्यभिधं ततोऽग्रहारं श्रयति स्मैष कदाचन स्वशिष्यैः ।
अनुगेहहुताग्निहोत्रदुग्धप्रसरत्पावनगन्धलोभनीयम् ॥४३॥

अहसन्तमनीक्षमाणमस्तस्पृहमज्ञातवचःप्रवृत्तिमज्ञम् ।
निजसूनुमिह द्विजोऽस्य कश्चिन्निदधे द्वादशवार्षिकं पदाग्रे ॥४४॥

करुणापरिणाहपारदृग्भिर्गुरुणा केवलमीक्षितः कटाक्षैः ।
स करामलकीकृतात्मतत्वोऽजनि हस्तामलकार्यनामधेयः ॥४५॥

समिन्धानो मन्थाचलमथितसिन्धूदरभवत्-
सुधाफेनाभेनामृतरुचिनिभेनात्मयशसा ।
निरुन्धानो दृष्ट्या परममह पन्थानमसतां
पराधृष्यैः शिष्यैररमत विशिष्यैष मुनिराट् ॥४६॥

इति दन्तिद्योतिदिवाप्रदोषाङ्क—सत्यमङ्गलरत्नखेटश्रीनिवासदीक्षित-तनूजस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरगुरुचरण सहजता-लब्धविद्यावैशद्यस्य राजचूडामणिदीक्षितस्य कृतिषु
शङ्कराभ्युदये काव्ये तृतीयः सर्गः ।

---

शिववल्ली श्रीवल्ली श्रीवलिरिति अग्रहारनाम ॥४२॥

हसति, ईक्षते, स्पृहयते, वदति, जानाति इति शिशोः क्रमात् वर्धमानस्य याः याश्चेष्टा लोके उपलभ्यन्ते, तेष्वेकामपि चेष्टां विना वयसा द्वादशवार्षिकम् ॥४४॥

# चतुर्थः सर्गः

## गोकर्णगमनम्

अथैकदासौ यतिसार्वभौमः सर्वाणि तीर्थानि चरन् सतीर्थ्यैः ।
घोरात्कलेर्गोपितधर्ममारत् गोकर्णमभ्यर्णजलार्णवोघम् ॥१॥

विरिञ्चनाम्भोरुहनाभवन्द्यं प्रपञ्चनाट्याद्भुतसूत्रधारम् ।
तुष्टाव वामार्धवधूकमस्ततुष्टावलेपं प्रणमन्गिरीशम् ॥२॥

वामालकावल्लभभावमुद्रासीमाविभागेन्द्रमणीशिलेव ।
रोमावली राजति यस्य मध्ये सोमावतंसः स सुखाय भूयात् ॥

वक्षोजभारावनतैकभागवैषम्यभूमापनिनीषयेव ।
कल्याणशैलं कलयन्कराग्रे शर्माणि निर्मातु सदाशिवोऽयम् ॥

आकांक्षितान्योन्यमुखाभिमुख्यमपूर्यमाणाधरचुंबनेच्छम् ।
साङ्गत्यमूरीकृतविप्रलम्भं सौख्याय भूयाद्विदमाद्विधूनोः ॥५॥

---

एकोऽभिन्नो गुरुः तीर्थो येषां, तेऽन्योन्यं सतीर्थ्याः । समाने तीर्थे गुरौ ये वसन्ति ते च सतीर्थ्याः पद्मपादादयः । आरत् प्राप ॥१॥

वामाः मनोहरा अलका यस्याः सा स्त्री, वल्लभः पुमान्, तयोर्भावस्य स्त्रीपुंभावस्य मुद्रायाः व्यवस्थितेः सीमाविभागाय न्यस्ता इन्द्रमणीशिलेव अर्धनारीश्वरशिववपुषोर्मध्यगता रोमावली राजति ॥२॥

शिवयोर्वपुषि हिमगिरिजाभागे वक्षोजभरेण याऽवनतिः, तत्कृतवैषम्यापनयनाय कल्याणशैलं मेरुं धनूरूपं आलम्बयष्टितया कराग्रे कलयति ॥४॥

एकशरीरित्वेन सङ्गतयोरपि अङ्गीकृतविश्लेषदुःखता आसीत् ।



वपुः स्मरामः क्वचन स्मरारेः बलाहकाद्वैतवदावदश्रि ।
सौदामिनीसाधिमसंप्रदायसमर्थनादेशिकमन्यतश्च ॥६॥

वामाङ्गसीमाङ्कुरदंशुतृण्याचञ्चन्मृगाञ्चत्तरदक्षपाणि ।
सव्यार्धशोभाकलमाग्रभक्षसाकांक्षकीरान्यकरं महोऽस्मि ॥७॥

कामाभिमानास्तिकनास्तिकाय कामाधिकस्पर्शनकर्मठाय ।
श्यामाविटांकूरचमत्कृताय श्यामारुणाय स्पृहयामि धाम्ने ॥८

अव्याजकारुण्यनिकेतचेताः सव्यार्धवीक्षाविनमन्मुखेन्दुः ।
दिव्या शुकव्यासमुखर्षिनव्या भव्याय भूयान्मम भावनेयम् ॥९

---

यतः अन्योन्यं मुखाभ्यामाभिमुख्यं कांक्षणीयावस्थायामास्ते, संमुखीनत्वाभावात् । अत एव अधरचुंबनेच्छापि अपूर्यमाणैव । अन्योन्यमभिन्नतया संगतावपि विश्लेषोत्थं दुःखमेव दर्शनाद्यधरचुंबनाकांक्षाया उदयात् तदपूर्तेश्च ॥५॥

क्वचन वामे वलाहकस्य नीलमेघस्य वदावदा अधिवक्त्री श्रीः शोभा, यस्मिन्, मेघश्यामं, अन्यतश्च दक्षिणे सौदामिन्यास्तटितः साधिम्नः साधुत्वस्य यः संप्रदायः, तत्समर्थनायां देशिकं तटिदरुणं वपुः ॥

वामाङ्गसीम्नि पार्वतीरूपे वामभागे अंकुरन्ती अंशव एव तृण्या तृणसमूहः तद्ग्रसनाय चञ्चन् मृगः, शिवरूपदक्षकरे यस्य सव्यार्धस्य शोभैव कलमाग्रं शालिप्ररोहः तस्य भक्षे भक्षणे साकांक्षः कीरः शुकः, तद्वान् दक्षिणेतरः करः यस्य तथाभूतः महोऽहमस्मि ॥७॥

कामस्याभिमानो गर्वः सर्वमनोमथनजः, स च आस्तिकः अस्तीति श्रद्दधानः तस्यास्तित्वममन्वानं नास्तिकं कामगर्वविरोधि, कामात् कामितादधिकस्य स्पर्शे वितरणे कर्मठं कर्मणि शूरं, श्यामाया रात्रेः विटस्य कामुकस्य चन्द्रस्य अंकुरेण चन्द्रकलया चमत्कृतं प्राप्तानन्दं वामे श्यामं दक्षिणेऽरुणं च तस्मै नीललोहिताय तेजसे धाम्ने स्पृहयामि ॥८॥

फणावृतैकस्तनमर्धभागे यस्योत्तरीयं ह्युपवीतमेव ।
मातापितृभ्यां जगतो मम स्यात्कस्मैचिदस्मै महसे नमस्या ॥

वामेतरोरःस्थललोलदामफणामणीनायकभावुकश्रीः ।
मुक्तावली दीव्यति यत्कुचाग्रे मोदाय भूयान्मम देवतेयम् ॥११

कण्ठप्रभाबन्धुरमभ्रबृन्दं कचोच्चयं तत्तटितो जटाभिः ।
तदंबु किञ्चाभ्रधुनीं वितन्वन् तन्वीत धन्वी गिरिणैष सौख्यम् ॥

प्रायेऽसपत्नत्वमुदा प्रकामं प्रवर्धमानैककुचाग्रघर्षात् ।
निम्नं यदीयं चिबुकं नितान्तं दिश्यान्मुदं मे परदेवतेयम् ॥१३॥

---

सव्यार्धस्य पार्वतीरूपस्य वीक्षायै विनमन् मुखेन्दुः यस्याः, ऋषिभिः नव्या स्तुत्या, दिव्या भावना स्थितिः ॥९॥

नागयज्ञोपवीति शिवाख्यं महः । तदेव जगतो मातापितरौ । तस्योपवीतं वामभागे स्तनावरकत्वेन दक्षिणभागे उत्तरीयत्वेन चाभाति ।

"यस्योपवीतगुण एव फणावृतैकवक्षोरुहः कुचपटीयति वामभागे ।
तस्मै ममास्तु तमसामवसानसीम्ने चन्द्रार्धचारुशिरसे महसे नमस्या ॥
इति एतस्यैव कवेः कृतौ कमलिनीकलहंसे मङ्गलश्लोकः ॥१०॥

दक्षिणोरःस्थले लोलः दामभूतः सर्पः तत्फणामणिसंपर्कादधिकमंगलकान्तियुता मुक्तावली वामोरसि कुचाग्रे भाति ॥११॥

नीलकण्ठप्रभया बन्धुरं मनोज्ञं कचोच्चयं केशसंहतिं अभ्रबृन्दतया वितन्वन् तदनुरूपाभिर्जटाभिः तटितो वितन्वन्, अभ्रधुनीं गंगां तन्मेघवृष्टांबुतया वितन्वन्, गिरिणा मेरुणा धन्वी ॥१२॥

वामस्य स्तनस्य दक्षिणः स्तनः सपत्नः शत्रुर्न भविता, दक्षिणस्य पुंरूपत्वात् । अतो निस्सपत्नतया जातेन मोदेन प्रकामं प्रवर्धते वामः स्तनः । तदग्रघर्षणात् हेतोः निम्नं चिबुकम् ॥१३॥



महीध्रकन्यागलसङ्गतोऽपि माङ्गल्यतन्तुः किल हालहालम् ।
यत्कण्ठदेशेऽकृत कुण्ठशक्तिमैक्यानुभावादयमस्मि भूमा ॥१४॥

गुणत्रयातीतविभावमित्थं गोकर्णनाथं वचसाऽर्चयित्वा ।
तिस्रस्स रात्रीस्त्रिजगत्पवित्रे क्षेत्रे मुदाऽत्र क्षिपति स्म कालम् ॥

हरिहरक्षेत्रवासः

वैकुण्ठकैलासविवर्तभूतं हरस्ततोऽघं हरिशङ्कराख्यम् ।
दिव्यस्थलं देशिकसार्वभौमः तीर्थप्रवासी नचिरादयासीत् ॥१६

भ्रमापनोदाय भिदावदानां
अद्वैतमुद्रामिह दर्शयन्तौ ।
आराध्य देवौ हरिशङ्करौ द्वौ
द्व्यर्थाभिरित्यर्चयति स्म वाग्भिः ॥१७॥

उदञ्चयन् सोमकलानिवासं गामादरात्कलयन्ननादिम् ।
मैनं महः किञ्चन दिव्यमङ्गीकुर्वन् विभुर्मे कुशलानि कुर्यात् ॥

---

मांगल्यतन्तुर्हालाहलश्च कण्ठे वामदक्षिणभागयोः स्थितौ परस्परविरुद्धौ । हालाहलः मांगल्यतन्तुना कुण्ठशक्तिरिति चित्रम् । तस्य भूम्नः ऐक्यानुसन्धानात् अयमहमस्मि भूमा पूर्णः ॥१४॥

द्व्यर्थाभिः हरिशङ्करपराभिः ॥१७॥

सोमकाख्योऽसुरः वेदापहारी, तं लाति गृह्णाति आरक्षति आच्छादयति, इति सोमकलः, अः कमठः तन्निवासभूतः अनिवासः सोमकलोऽनिवासश्च यः समुद्रः तं उदञ्चयन् उद्वेलमुद्धर्षयन्, समुद्रान्तः निलीनस्य सोमकस्य बहिर्यापनाय समुद्रं क्षोभयन् । तत् ततः अनादिं गां वेदरूपां अनादिं गां नौकारूपां भुवं वा आदरेण कलयन् प्रकाशयन्, मैनं मीनसंबन्धि दिव्यमप्राकृतं महो वपुः अंगीकुर्वन्, हरिः । सोम-

यो मन्दरागं दधदादितेयान्
सुधाभुजः स्मातनुते विषादी ।
स्वामिन् डुलीलोचितचारुमूर्ते
कृपामपारां स भवान् विधत्ताम् ॥१९॥

उल्लासयन्यो महिमानमुच्चैः स्फुरद्वराहीशकलेवरोऽभूत् ।
तस्मै विदध्मः करयोरजस्रं सायन्तनाम्भोरुहसामरस्यम् ॥२०॥

समावहन् केसरितां वरां यः स्फुरद्द्विषत्कुञ्जरमाजघान ।
प्रह्लादमुल्लासितमादधानं पञ्चाननं तं प्रणुमः पुराणम् ॥२१॥

---

कलाया निवासभूतं जटाभारं उदञ्चयन् विस्तृणन्, अनादिं गां जलं गंगारूपं तत् तत्र जटासु आदरात्कलयन्. मेनाया हिमवत्पत्न्या इदं पार्वतीरूपं महो अंगीकुर्वन् वामाङ्गतया आकलयन् हरः ॥१८॥

डुली कमठी, तस्या उचिता रुचिरा मूर्तिः कमठरूपा, यस्य ते, तथाभूत हरे, मन्दराख्यं अगं पर्वतं दधत्, अविषादी अतिदुर्भरमन्दर-धारणेऽप्यखिन्नः, अमृतोत्पत्तौ हेतुभूतत्वेन आदितेयान् सुधाभुजः भवा-नातनुते । यः शिवः भवान् अमन्दं अनल्पं रागं प्रीतिं सुरेषु दधत्, हालाहलभुक् विषापनयनेन स्वस्थहृदयान्देवान् सुधामपाययत् । डोलय-त्युत्क्षिपति शरीरादिकं हावभावादिप्रदर्शनाय, ताण्डवरूपा डुली क्रीडा, तस्यां लोचिता अवलोकिता चारुमूर्तिः यस्य सः, तथाभूत शम्भो ॥१९॥

करयोः सायन्तनाम्भोरुहसामरस्यं सङ्कोचं, विदध्मः करौ मुकुली-कृत्य प्रणमामः । महीयत इति महिः भूमिः, स्वदंष्ट्रया उद्ध्रियमाणायाः तस्याः मानं परिमाणं उच्चैः उल्लासयन् प्रकाशयन्, वराहीशः पुंवराहः तस्य गात्रं यस्य सोऽभूत् हरिः । वरः श्रेष्ठः अहीनामीशः स कलेवरे भूषणत्वेन यस्य । आत्मनो महिमानं श्रेष्ठतां उल्लासयन् शिवः ॥२०॥

केसरी सिंहः, द्विषन् शत्रुरेव कुञ्जरः हिरण्यकशिपुः । पञ्चाननं व्यात्ताननं नृसिंहं हरिम् । के शिरसि सरितां वरां गङ्गां समावहन्,



उदीतबल्याहरणाभिलाषो यो वामनोहार्यजिनं वसानः ।
तपांसि कान्तारहितो व्यतानीदाद्योऽवतादाश्रमिणामयं नः ॥२२

येनाधिकोद्यत्तरवारिणाभूत् जितोऽर्जुनः संगररंगभूमौ ।
नक्षत्रनाथस्फुरितेन तेन नाथेन केनापि वयं सनाथाः ॥२३॥

विलासिनालीकभवेन धाम्ना कामं द्विषन्तं स दृशाश्ममस्यन् ।
देवो धरापत्यकुचोष्मसाक्षी देयादमन्दात्मसुखानुभूतिम् ॥२४॥

---

द्विषन्तं कुञ्जरं गजासुरं, प्रह्लादं प्रमोदं पञ्चाननं सद्योजातादिवक्त्रपञ्चक-युतं शिवम् ॥२१॥

उदीतः उच्छ्रितो गर्वेण, यो बलिनामकोऽसुरः, तस्माद्भूमेराहरणे, अथवा तस्य विनयने अभिलाषो यस्य, मनोहारि अजिनं वसानः, कान्तारहितो विवाहरहितः, आश्रमिणां ब्रह्मचर्याद्याश्रमवतां आद्यः ब्रह्मचारी हरिः । बलिमाहन्तीति बल्याहा, वामनो विष्णुः तस्य बल्याहनः कृष्णावतारकाले, तेन सह रणे बाणासुरपक्षपातेन कृतो-ऽभिलाषः उदीतोऽधिकः यस्य, कान्तया पार्वत्या रहितो दक्षिणामूर्ति-रूपः, आश्रमिणां ऋषीण माद्यः नेता गुरुश्च शम्भुः ॥२२॥

उद्यन् उद्धृतः तरवारिः खड्गो येन परशुरामेण अर्जुनः कार्तवीर्यो जितः, क्षत्रनाथा राजानः, न क्षत्रनाथा यथा तथा स्फुरितं यस्य, तेन विष्णुना । उद्यत्तरं अतिशयेनोद्यत् वारि गङ्गाजलं यस्य तेन जटाधृत-गङ्गेन, अर्जुनेन जितः शिरसि गाण्डीवेन हतः, नक्षत्रनाथश्चन्द्रः, तेन स्फुरितेन मौलौ भासितेन शम्भुना ॥२३॥

विलसिना नालीकभवेन धाम्ना ब्रह्मास्त्रेण, कामं यथेच्छं द्विषन्तं दृशाश्मं दृशा नेत्रं, अश्मनो विकार आश्मः । नेत्रे अश्मेव असह्यं, रावणं अस्यन्, धराया अपत्यं सीता । विलासिना अलीकभवेन निटिलजेन धाम्ना अग्निना द्विषन्तं कामं मन्मथं, आश्मं अश्मविकारो धूलिः, दृशा तृतीयेन अश्मधूलिं अस्यन्, धरः पर्वतः तस्य सुता पार्वती ॥

उत्तालकेतुः स्थिरधर्ममूर्तिः हालाहलस्वीकरणप्रवीणः ।
स रोहिणीशानिशचुम्ब्यमाननिजोत्तमाङ्गोऽवतु कोऽपि भूमा ॥

विनायकेनाकलिताहितापं निषेदुषोत्सङ्गभुवि प्रहृष्यन् ।
यः पूतनामोहनचित्तवृत्तिरव्यादसौ कोऽपि कलापभूषः ॥२६॥

पाठीनकेतोर्जयिने प्रतीतसर्वज्ञभावाय दयैकसीम्ने ।
प्रायः क्रतुद्वेषकृतादराय बोधैकधाम्ने स्पृहयामि भूम्ने ॥२७॥

व्यतीतचेतोविषयं जनानां विद्योतमानाय तमोनिहन्त्रे ।
भूम्ने सदाघासकृताशयाय भूयांसि मे सन्तुतमां नमांसि ॥२८॥

---

उद्गतः तालः केतुः ध्वजो यस्य, हाला सुरा, हलं लाङ्गलं, रोहिणीशो वसुदेवः, इति बलरामः । उत्तालकेतुरुन्नतवृषभध्वजः, हालाहलो विषं, रोहिणीशश्चन्द्रः ॥२५॥

विः पक्षी । विनायकेन गरुडेन, अकलितोऽननुभूतः अहेः तापः यस्मिन्कर्मणि तत्तथा, उत्संगभुवि समीपे निषेदुषा प्रहृष्यन् । शेषश्वासानिलजविषज्वालातापदुःखरहिततया पुरस्तादुपविष्टो गरुडः । पूतनाया मोहने चित्तवृत्तिर्यस्य, कलापो मयूरबर्हः । विनायको गणपतिः सः शिववक्षस्थलस्याभरणभूतनागानां तापं आकलयति स्वचेष्टया, तथा उत्सङ्केऽङ्के स निषेदिवान् । पूतनामा, पूतानि नामानि शिवशंकरादीनि यस्य सः, परमेश्वरता-सर्वज्ञत्व-सर्वकर्तृत्व-सर्वनियन्तृत्वादिगुणवान् शंभुरिति ऊहनाः ऊहं कुर्वन्तः, तेषां महर्षीणां चित्ते वृत्तिः यस्य । कलापः काञ्ची रशना भूषा वामांगस्थपार्वत्या धृता यस्य ॥२६॥

बुद्धः पाठीनकेतोः मन्मथस्य जयी दिगम्बरत्वात् । क्रतौ क्रतुकर्तरि विप्रे च द्वेषः तत्र कृतादरः । शिवोऽपि मन्मथजयी, दक्षक्रतुद्वेषकृतादरः ॥२७॥

व्यतीतोऽतिक्रान्तः चेतसो विषयः, मनोविषयभावो यस्मिन् कर्मणि तत्तथा विद्योतमानाय, मनोऽतीताय । घासे तृणे कृताशयः



वृषाकपायीवरयोः सपर्यां वाचातिमोचारसयेति तन्वन् ।
मुनिप्रवीरो मृदितात्ममोहो मूकाम्बिकायाः सदनं प्रतस्थे ॥२९

## मूकाम्बिकाक्षेत्रमार्गे मृतशिशोः उज्जीवनम्

अङ्के निधाय व्यसुमात्मजातं मोहाकुलौ हन्त मुहुः प्ररुद्य ।
तदेकपुत्रौ द्विजदम्पती स दृष्ट्वा दयाधीनतया शुशोच ॥३०॥

अपारमश्वत्यथ शोकमस्मिन्नभूयतोच्चैरशरीरवाचा ।
जायेत संरक्षितुमक्षमस्य जनस्य दुःखाय परं दयेति ॥३१॥

आकर्ण्य वाणीमशरीरिणीं तामसाविति व्याहरति स्म तज्ज्ञः ।
जगत्त्रयीरक्षणदक्षिणस्य सत्यं तवैकस्य तु शोभते सा ॥३२॥

इतीरयत्येव यतौ द्विजातेः सुतस्सुखं सुप्त इवोदतिष्ठत् ।
समीपगैः सर्वजनीनमस्य चरित्रमालोक्य विसिष्मिये च ॥३३॥

## परकायप्रवेशः

अथानिशाखेटवशादटव्यां मूले तयोर्मोहवशाद्गतासुम् ।
निरीक्ष्य मार्गे मरुगं नृपालं सनन्दनं प्राह स संयमीन्द्रः ॥३४॥

---

कल्किः अश्वारूढः, अश्वरक्षणाय घासे दृष्टिः तस्य । शिवस्तु अघासे पापनिर्हरणे कृताशयः ॥२८॥

वृषाकपी विष्णुः शिवश्च, तयोः पत्न्यौ वृषाकपाय्यौ श्रीगौर्यौ, तयोः वरौ पती । मोचा कदली, अतिमोचारसया कदलीतोऽप्यतिमधुरया ॥२९॥

मरुगः अमरुक इति माधवीयादौ । अनिशं आखेटस्य मृगयाया वशाद्धेतोः ॥३४॥

सौन्दर्यसौभाग्यनिकेतसीमा: परश्शता यस्य सरोरुहाक्ष्य: ।
स एष राजा मरुगाभिधान: शेते परासु: श्रमतो धरण्याम् ॥

प्रविश्य कायं तमिमं परासोर्नृपस्य राज्येऽस्य सुतं निवेश्य ।
योगानुभावात्पुनरप्युपैतुं उत्कण्ठते मानसमस्मदीयम् ॥३६॥

अन्यादृशानामदसीयनानाकुशेशयाक्षीकिलिकिञ्चितानाम् ।
सर्वज्ञतानिर्वहणाय सोऽहं साक्षित्वमप्याश्रयितुं समीहे ॥३७॥

इत्यूचिवांसं यतितल्लजं तं सनन्दन: प्राह ससान्त्वमेनम् ।
सर्वज्ञ नैवाविदितं तवास्ति तथापि भक्तिर्मुखरं तनोति ॥३८॥

मत्स्येन्द्रनामा हि पुरा महात्मा गोरक्षमादिश्य निजांगगुप्त्यै ।
नृपस्य कस्यापि तनुं परासो: प्रविश्य तत्पट्टणमाससाद ॥३९॥

भद्रासनाध्यासिनि योगिवर्ये भद्राण्यनिद्राण्यभवन्प्रजानाम् ।
ववर्ष कालेषु वलाहकोऽपि सस्यानि चाशास्यफलान्यभूवन् ॥

विज्ञाय विज्ञा: सचिवा नृपस्य काये प्रविष्टं कमपीह दिव्यम् ।
समादिशन् राजसरोरुहाक्षी: सर्वात्मना तस्य वशिक्रियायै ॥४१

सङ्गीतलास्याभिनयादिमेषु संसक्तचेता ललितेषु तासाम् ।
स एष विस्मृत्य मुनिस्समाधिं सर्वात्मना प्राकृतवद्बभूव ॥४२॥

---

अन्यादृशानामनन्यसाधारणानां अस्य बहूनां पत्नीनां किलिकिञ्चितानां रोषाश्रुहर्षभीत्यादिभावसांकर्यस्य, साक्षित्वं असंगत्वेन तदीक्षितृत्वं सर्वज्ञताया: निर्वहणाय अपेक्षितम् ॥३७॥

मुखरं अप्रियवादिनं अनपेक्षितं असमये वदन्तम् ॥३८॥

भद्राणि मङ्गलानि अनिद्राणि जागरूकाणि । आशास्यफलानि अभीष्टफलानि ॥४०॥



गोरक्ष एषोऽथ गुरो: प्रवृत्तिं विज्ञाय रक्षन् बहुधाऽस्य देहम् ।
निशान्तकान्तानटनोपदेष्टा नितान्तमस्याभवदन्तरङ्ग: ॥४३॥

तत्रैकदा तत्वनिबोधनेन निवृत्तरागं निजदेशिकं स: ।
योगानुपूर्वीमुपदिश्य निन्ये यथापुरं प्राकृतमेव देहम् ॥४४॥

हन्तेदृशोऽयं विषयानुषंग: किञ्चोर्ध्वरेतोव्रतखण्डनेन ।
किं नोदयेत्किल्बिषमुल्बणं तत्कृत्यं भवानेव कृती विवेक्तुम् ॥

इत्थं समाविष्कृतभावमेनं सनन्दनं शश्वदथाभिनन्द्य ।
अनुज्झितन्यायमविस्तृतं च शनै: समाभाषत भाष्यकार: ॥४६

यदीरितं वत्स हितोपदेष्ट्रा तदेतदद्धा निगमस्तथापि ।
असङ्गिनो न प्रभवन्ति कामा हरेरिवाभीरवधूसखस्य ॥४७॥

वज्रोलियोग: प्रतिभू: स एष वत्सावकर्णित्वविपर्यये न: ।
चिरं विचारेण कृतं श्व एव समागमिष्याम्यथवा परश्व: ॥४८॥

---

निशान्ते प्रत्यूषे कान्तानां राजमहिषीणां नटनस्य नर्तनविद्याया: उपदेष्टा, तद्वेषेण राज्ञोऽन्तरंग: , दिवा रात्रौ च मत्स्येन्द्रदेहं रक्षन्॥४३॥

ऊर्ध्वरेतोव्रतखण्डनेन ब्रह्मचर्यव्रतखण्डनेन ॥४५॥

आभीरवधूनां गोपीनां सखा कृष्ण:, तस्यैव कामा न प्रभवन्ति वशीकर्तुम् । व्यसनहेतवो न भवन्ति । "न मय्यावेशितधियां काम: कामाय कल्पते । भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते ।" इति कृष्णे निहितमनसामपि विषये कामो न प्रभवति । किमुत कृष्णविषये ॥

वज्रोलिर्नाम हठयोग: ऊर्ध्वरेतस्त्वसाधक: । अवकीर्णी ध्वस्तव्रत: अगम्यागमनेन त्यक्तव्रत: । तद्रूपे विपर्यये व्यतिक्रमे प्रतिभू: दोषवारको घटक: ॥४८॥

इतीरयन्नेव नृपस्य कायं विशन्स साक्षात्कृतकामतन्त्रः ।
पद्यानि श्रृंगारपरिष्कृतानि शतं वदन्नेव पुनस्समागात् ॥४९॥

## मूकाम्बिकाक्षेत्रदर्शनम्

रम्योपशल्यं कृतमालसालरसालहिन्तालतमालतालैः ।
सिद्धिस्थलं साधकसंसदां तन्मूकाम्बिकाधाम पुनर्जगाहे ॥५०॥

उच्चावचानन्दजबाष्पमुच्चैः उद्गीर्णरोमाञ्चमुदारभक्ति ।
अम्बामिहापारकृपावलम्बां संभावयन्नस्तुत निस्तुलं सः ॥५१॥

पारेपरार्धं पदपद्मभस्सु षष्ट्युत्तरं ते त्रिशतं तु भासः ।
आविश्य वह्न्यर्कसुधामरीचीन् आलोकवन्त्यादधते जगन्ति ॥

अन्तश्चतुष्षष्ट्युपचारभेदैः अन्तेवसत्काण्डपटीप्रदानैः ।
आवाहनाद्यैस्तव देवि नित्यमाराधनामादधते महान्तः ॥५३॥

---

अमरुकशतकमिति प्रसिद्धानि ॥४९॥

परस्य ब्रह्मण आयुषि अर्धं, परार्धद्वयजीवी ब्रह्मा, पारेपरार्धं परार्धसंख्यामतीत्य वर्तमानासु पदपद्माभ्यां निस्सरन्तीषु भास्सु मध्ये षष्ट्युत्तरत्रिशतसंख्याका भास एव चराचराणि भासयन्ति । ताः वह्नि अर्कं सुधामरीचिं चाविश्य आलोकं ददन्ति । वह्नौ अष्टोत्तरशतं, सूर्ये षोडशोत्तरशतं चन्द्रे षट्त्रिंशदुत्तरशतं किरणाः पिण्डाण्डब्रह्माण्ड-प्रकाशकाः । भूमौ वह्निः अन्तरिक्षे सूर्यः तदुपरि नक्षत्रमण्डले चन्द्र इति ब्रह्माण्डे, मूलाधारस्वाधिष्ठानामकाग्निखण्डे अग्निः, मणिपूरकानाहताख्यसूर्यखण्डे सूर्यः, विशुद्धयाज्ञाख्यचन्द्रखण्डे चन्द्रश्च पिण्डाण्डे प्रकाशकाः ॥५२॥

काण्डपटी जवनिका । अन्तेवसद्भिः सेवकैः क्रियमाणैः काण्डपटीप्रदानैः जवनिकाप्रच्छादनैः संवृततया गुप्ततया क्रियमाणैः चतुष्षष्टिभिरुपचारैः ॥५३॥



अम्बोपचारेष्वधिहृत्तु षष्टिं शुद्धयाज्ञयोः शुद्धिदमेकमेकम् ।
सहस्रपद्मे द्वितयं तु साधु तन्वन्ति धन्यास्तव तोषहेतोः ॥५४॥

आराधनं ते बहिरेव केचित् अन्तर्बहिश्चैकतमेऽन्तरे वा ।
अन्ये परे त्वम्ब कदापि कुर्युः नैव त्वदैक्यानुभवैकनिष्ठाः ॥५५

अष्टोत्तरत्रिंशति याः कलानां अर्घ्याः कलाः पञ्च निवृत्तिमुख्याः ।
तासामुपर्यम्ब तवांघ्रिपद्मं विद्योतमानं विबुधा भजन्ते ॥५६॥

कालाग्निरूपेण जगन्ति दग्ध्वा
सुधात्मनाऽऽप्लाव्य समुत्सृजन्तीम् ।
ये त्वामवन्तीममृतात्मनैव
ध्यायन्ति ते सृष्टिकृतो भवन्ति ॥५७॥

---

क्रियमाणे उपचाराणां चतुष्षष्टौ, हृदये षष्टिः, विशुद्धौ कण्ठे एकं आज्ञायां एकं, सहस्रदले पद्मे द्वादशान्तस्थे द्वाविति स्थानभेदः ॥

केचित्कुलाचाररता बहिः समयाचाररताः अन्तः मिश्राचारा अन्तबहिश्च आराधनं कुर्वन्ति । उत्तमाधिकारिणस्तु प्रशान्तेतराखिल-बाह्याभ्यन्तरार्थानुभवाः, त्वदैक्यानुभवमहिम्ना चिदानन्दरूपा निर्व्यापाराः तिष्ठन्ति ॥५५॥

अमृताद्याः षोडश सोमकलाः तपिन्याद्या द्वादश सूर्यकलाः, धूमार्चिराद्या दश वह्निकलाः एवं कलाः अष्टत्रिंशत् । ताभ्योऽपि अर्घ्याः कलाः पृथिव्यादिभूतपञ्चककलाः पञ्च निवृत्तिः प्रतिष्ठा विद्या शान्तिः शान्त्यतीतेति । तासामुपरि सहस्रारपद्मे तवांघ्रिपद्मं विद्योतते ।

“महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥”

इति सौन्दर्यलहर्यां शङ्करभगवत्पादाः ॥५६॥

जगत्प्रलयसृष्टिस्थितिकारिण्याः ध्यानेन सृष्टिशक्तिः जायते ॥५७॥

ये प्रत्यभिज्ञामतपारविज्ञाः धन्यास्तु ते प्राग्विदितां गुरूक्त्या ।
सैवाहमस्मीति समाधियोगात् त्वां प्रत्यभिज्ञाविषयं विदध्युः ॥

आधारचक्रे च तदुत्तरस्मिन् आराधयन्त्यैहिकबोधलुब्धाः ।
उपासते ये मणिपूरके त्वां वासस्तु तेषां नगराद्बहिस्ते ॥५९॥

अनाहते देवि भजन्ति ये त्वां अन्तःस्थितिस्त्वन्नगरे तु तेषाम् ।
शुद्धयाज्ञयोर्ये तु यजन्ति तेषां क्रमेण सामीप्यसमानभोगौ ॥६०

सहस्रपत्रे ध्रुवमण्डलाख्ये सरोरुहे त्वामनुसन्दधानः ।
चतुर्विधैक्यानुभवास्तमोहः सायुज्यमम्बाश्नुति साधकेन्द्रः ॥६१

श्रीचक्रषट्चक्रकयोः पुरोऽथ श्रीचक्रमन्त्रयोरपि चिन्तितैक्यः ।
चक्रस्य मन्त्रस्य ततस्त्वयैक्यं क्रमादनुध्यायति साधकेन्द्रः ॥६२

कापालिकाय सिद्धिदानम्

इत्यर्चयित्वा गिरिजां वचोभिः एकान्तमाश्रित्य वसन्तसेनम् ।
कालायसाकल्पितघोरशूलः कापालिकः कश्चिदिदं बभाषे ॥६३॥

---

तदिदन्तावगाहिज्ञानेन, सा गुरुवाक्येन ज्ञाता परमेश्वर्येवाहमस्मीति प्रत्यभिज्ञाविषयं विदध्युः ॥५८॥

मूलाधारे स्वाधिष्ठाने चोपासनेन ऐहिकसुखलाभं, मणिपूरके त्वल्लोकबहिर्वासं, अनाहते उपासनेन सालोक्यं, विशुद्धौ सामीप्यं, आज्ञायां सारूप्यं, सहस्रारे सायुज्यं चाप्नोति । चतुर्विधैक्यानुभवेन तस्य मोहनाशः । १. नवयोन्यात्मकश्रीचक्रस्य पिण्डगतमूलाधाराद्यात्मकषट्चक्रस्य चैक्यं, २. श्रीचक्रस्य पञ्चदशाक्षर्यात्मकमन्त्रस्य चैक्यम्, ३. श्रीचक्रस्य देव्याश्चैक्यम्, ४. श्रीविद्याया देव्याश्चैक्यं, इति चतुर्विधमैक्यम् ॥६२॥

श्रीशैले काश्यां वा कापालिकसङ्गमो वर्ण्यते ग्रन्थान्तरेषु ॥६३॥



परोपकारं न विनास्ति किञ्चित्प्रयोजनं ते विधुतैषणस्य ।
अस्मादृशाः कामवशास्तु युक्तायुक्ते विजानन्ति न योगिवर्य ॥

जीमूतवाहो निजजीवदायी दधीचिरप्यस्थि मुदा ददानः ।
आचन्द्रताराकमपायशून्यं प्राप्तौ यशः कर्णपथं गतौ हि ॥६५॥

मूर्धाभिषिक्तस्य शिरःकपालं मुनीशितुर्वा मम सिद्धिहेतुः ।
आद्यं पुनर्मे मनसाप्यलभ्यं ततः परं तत्रभवान् प्रमाणम् ॥६६॥

तथेति तस्मिन्दयया मुनीन्द्रावात्मानमात्मन्यथ योजयित्वा ।
समाधिलीने सति हा हताशश्चकर्ष कोशाच्चटुलां कृपाणीम् ॥

समागतस्तत्र यदृच्छयाथ सनन्दनो वीक्ष्य दुरीहचेष्टाम् ।
सस्मार सद्यः प्रणतार्तिहारि प्रह्लादवत्स्वं परमं महस्तत् ॥६८

आविष्कृताविर्भवनः क्षणेन दंष्ट्रांकुरप्रोतदुरीहदेहः ।
नृत्यन्नतानीन्नृहरिर्विदीर्णद्युपट्टणाट्टालकमट्टहासम् ॥६९॥

प्रह्लादवश्यो भगवान् कथं वा
प्रसादितोऽयं नृहरिस्त्वयेति ।
सविस्मयैः स्निग्धजनैः स पृष्टः
सनन्दनः सस्मितमित्यवादीत् ॥७०॥

पुरा किलाहोबिलभूधराग्रे पुण्यं समाश्रित्य किमप्यरण्यम् ।
भक्तैकवश्यं भगवन्तमेनं ध्यायन्ननेकान् दिवसाननैषम् ॥७१॥

---

हृताशः कुत्सिताशो दुष्टाशो वा ॥६७॥

हिरण्यकशिपुना शस्त्र उद्यते प्रह्लादः नृसिंहं सस्मार । तथा कापालिकेन खड्ग उद्यते अयं सस्मार ॥६८॥

किमर्थमेको गिरिगह्वरेऽस्मिन् वाचंयम त्वं वससीति शश्वत् ।
केनापि पृष्टोऽत्र किरातयूना प्रत्युत्तरं प्रागहमित्यवोचम् ॥७२

आकण्ठमत्यद्भुतमर्त्यमूर्तिः कण्ठीरवात्मा परतश्च कश्चित् ।
मृगो वनेऽस्मिन्मृगयो वसन्मे भवत्यहो नाक्षिपथे कदापि ॥७३॥

इतीरत्येव मयि क्षणेन वनेचरोऽयं प्रविशन्वनान्तम् ।
निबध्य गाढं नृहरिं लताभिः पुण्यैरगण्यैर्निदधे पुरो मे ॥७४॥

महर्षिभिस्त्वं मनसाप्यगम्यो वनेचरस्येश कथं वशेऽभूः ।
इत्यद्भुताविष्टहृदा मयाऽसौ विज्ञाप्यमानो विभुरित्यवादीत् ॥

एकाग्रचित्तेन यथाऽमुनाहं ध्यातस्तथा धातृमुखैर्न पूर्वैः ।
नोपालभेथास्त्वमितीरयन्मे कृत्वा प्रसादं कृतवांस्तिरोधिम् ॥७६

आकर्ण्य तां पद्मपदस्य वाणीमानन्दमग्नैरखिलैरभावि ।
जगर्ज चोच्चैर्जगदण्डभाण्डं भूयोऽपि भूम्ना दलयन्नृसिंहः ॥७७

तद्ध्वानेन द्रुतशिथिलितध्यानयोगो मुनीन्दुः
पश्यन्नग्रे नरमृगवपुः प्राक्तनं धाम दिव्यम् ।
प्रत्यासीदत्प्रसृतियुगलं प्राप्तभक्तिप्रकर्षं
प्रत्यग्रोद्यत्पुलकमुकुलं प्रास्तुतादस्स्तुताय ॥७८॥

कल्पान्तोज्जृंभमाणप्रमथपरिवृढप्रौढलालाटवह्नि-
ज्वालालीढत्रिलोकीजनितखटखटध्वानधिक्कारधुर्यः ।

---

प्राक्तनं पुरातनं अनादि । प्रत्यासीदत् अन्योन्यं सङ्घटमानं प्रसृति-युगलं अञ्जलिः, निकुब्जपाण्योर्युगलं, यस्मिन्कर्मणि, तथा अदः स्तुताय, अमुष्य स्तवनाय ॥७८॥



मध्ये ब्रह्माण्डभाण्डोदरकुहरमसावेत्य दुःस्थामवस्थां
स्त्यानस्त्यानो मदीयं दलयतु दुरितं श्रीनृसिंहाट्टहासः ॥

मध्येऽवानद्धवातन्धयगुणवलयेन्धानमन्थानभूभृ-
न्मन्थप्रक्षोभिदुग्धोदधिघनलहरीस्फारनादावघोरः ।
कल्पान्तोन्निद्ररुद्रोत्सवभवडमरुध्वानबद्धाभ्यसूयो
घोरोऽयं कर्णघोषः क्षपयतु नृहरेरंहसां संहतिं वः ॥८०॥

क्षुन्दानो मंक्षु कल्पावधिसमयसमुज्जृंभदम्भोदगुंभ-
स्फूर्जद्दंभोळिसङ्घस्फुरदुरुरटिताखर्वगर्वप्ररोहान् ।
क्रोडाक्रोडेन्द्रघोणासरभसविसरद्घोरघुर्घूरवश्रीः
गम्भीरस्तेऽट्टहासो हरहर नृहरे रंहसांहांसि हन्यात् ॥

---

प्रमथपरिबृढो रुद्रः । स्त्यानस्त्यानः अभीक्ष्णं शब्दसन्तानवान्, मध्येब्रह्माण्डभाण्डोदरं ब्रह्माण्डमध्ये दुस्स्थां अवस्थामेत्य कृच्छ्रेण विश्रान्तात्रस्थितिं प्राप्य, ब्रह्माण्डमध्यं भित्वा बहिर्निर्गत्य दूरं गत्वा कृच्छ्रेण समाप्तिं प्राप्य, तावत्पर्यन्तं व्याप्तवान् अट्टहासः ॥७९॥

मन्थानभूभृत् मन्दरः मध्येऽवानद्धेन वातन्धयो वासुकिः तद्रूपो गुणवलयः रज्जुबन्धः, तेन इन्धानः मन्थानभूभृत्, स एव मन्थः, तेन प्रक्षोभितो दुग्धोदधिः, तस्य घना लहरी, तस्याः स्फारः नाद इव अवघोरः । स्थितिकाले निद्राणो रुद्रः, तस्य कृत्याभावात् । प्रलयकाले कल्पान्ते उन्निद्रः रुद्रः, तदुत्सवभवो डमरुध्वानः, तेन बद्धाभ्यसूयः, नृहरेरुत्थितः यो घोषः तस्याघातेन जातो यः अस्मत्कर्णदेशे घोषः ।८०॥

मंक्षु शीघ्रं, कल्पावधिसमये प्रलये समुज्जृम्भतां अम्भोदानां संवर्ताख्यानां गुम्भे समूहे स्फूर्जतो ध्वनतो दंभोलिसङ्घस्य उरुरटितानां वज्रनिर्घोषाणां अखर्वान् अनल्पान् गर्वप्ररोहान् क्षुन्दानः चूर्णयन् । क्रोडाक्रोडस्य यज्ञवराहरूपेणावतीर्णस्य भगवतः घोणातः सरभसं निःसरतां घुर्घूरवाणां या श्रीः सा यस्मिन् सः रंहसा वेगेन अंहांसि पापानि हन्यात् ॥

स्तुत्या तुष्टादेष तुर्यावतारात्
मोहाक्रान्तं मोचयन् साधकं तम् ।
सिद्धिञ्चास्य श्रीमदार्योऽनुगृह्णन्
दान्तैः कैश्चित्तत्र कालं व्यनैषीत् ॥८२॥

इति दन्तिद्योतिदिवाप्रदीपाङ्क-सत्यमङ्गलरत्नखेटश्रीनिवासदीक्षित-तनूजस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरगुरुचरण सहजता-लब्धविद्यावैशद्यस्य राजचूडामणिदीक्षितस्य कृतिषु
शङ्कराभ्युदये काव्ये चतुर्थः सर्गः ।

---

भैरवो नृसिंहात् मोचितः अभीप्सितां च सिद्धिमवाप्नोति वृत्तमिश्र रस्यम् । अन्यत्र कापालिकः नृसिंहदंष्ट्राग्रप्रोतदेहो मृत्युमवाप्नोति । भगवत्पादा यस्यार्थे देहं त्यक्तुमैच्छन्, स तमर्थं प्राप्नोति कथा रुचिरा अत्र ॥८२॥

# पञ्चमः सर्गः

## अनन्तशयनक्षेत्रगमनम्

अथ देशिकेन्दुरधिगत्य तैर्थिकैः
शनकैरनन्तशयनाभिधं स्थलम् ।
समवेक्षतात्र सरसीरुहेक्षणं
श्रुतिचूलिकासमधिगम्यवैभवम् ॥१॥

स्वभुजार्गलालवणिमैकवाञ्छया
शयनीयतामुपगतं फणाभृतम् ।
अतसीसमद्युतिभिरङ्गकान्तिभिः
कलयन्तमिन्द्रमणिकुट्टिमोपमम् ॥२॥

स्मरवैरिशेखरसुधाकरेर्ष्यया
मकुटीभवन्तमिव भानुमण्डलम् ।
विहितं किरीटमरुणाश्मकन्दलैः
विदधानमात्मशिरसा विभूषितम् ॥३॥

स्फुटदुत्पलोदरदलोपमाङ्गक-
स्फुरदंशुबृन्दमतिदायिकैशिकम् ।

---

श्रुतिचूलिका उपनिषत् । तैर्थिकाः शिष्याः ॥१॥

भुजावर्गलाविव, तयोर्लवणिमा लावण्यम् । इन्द्रमणिः नील-मणिः ॥२॥

चन्द्रस्य परमेश्वरशिरोऽधिरोहणेन यत् महत्वं, तत्प्राप्नवानीति ईर्ष्यया । अरुणाश्म पद्मरागमणिः ॥३॥

मकुटारुणोपलमरीचिकातप-
च्छुरणानिशस्फुटितवक्त्रपङ्कजम् ॥४॥

चलचूर्णकुन्तलसुधानिशीथिनी-
सुदृढोपगूढनिटिलार्धचन्द्रकम् ।
करुणांबुपूरितदृगब्धितीरभू-
वनमालिकायतमनोज्ञचिल्लकम् ॥५॥

श्रवणावतंसितसितेतराम्बुज-
भ्रमदानशौण्डनिजलोचनाञ्चलम् ।
वदनारविन्दनिबिरीषसौरभ-
ग्रहणोदयत्कुतुकदीर्घनासिकम् ॥६॥

रसनाग्रजाग्रदरविन्दभूवधू-
नवमौक्तिकाभरणदन्तपङ्कजम् ।
कलशाम्बुराशितनयोष्ठमाधुरी-
गरिमैकसाक्षिरसनाग्रवल्लभम् ॥७॥

वदनारविन्दरमणीयतासुधा-
जलराशिविद्रुमलतायिताधरम् ।

---

कैशिकं केशसमूहः । मकुटगतस्य अरुणोपलस्य पद्मरागस्य यो मरीचिकातपः सूर्यरश्म्युत्थः तापः तस्य छुरणेन मिश्रणेन स्फुटितं वक्त्रपङ्कजं यस्य ॥४॥

मुधानिशीथिनी मिथ्यारात्रिः । चिल्लके भ्रुवौ ॥५॥

निबिरीषं निबिडं यत् वदनारविन्दसौरभं तद्ग्रहणाय उदयत्कुतुका दीर्घनासिका यस्य ॥६॥

अरविन्दभूवधूः सरस्वती । कलशांबुराशितनया लक्ष्मीः ॥७॥



रमणीयगण्डतलकान्तिवीचिका
विहरन्मणीमकरकुण्डलोज्ज्वलम् ॥८॥

वदनाम्बुजातबिसवल्लरीभवद्-
गलमूललग्नमृगनाभिकर्दमम् ।
उपलालयन्तमनिशं भुजान्तरे
कमलासहोदरतयैव कौस्तुभम् ॥९॥

जठरान्तरावसथविष्टपत्रयी-
प्रकटीक्रियापरवलित्रयाञ्चितम् ।
निजनाभिपङ्कजमधुव्रतावली-
मतिदायिरोमलतिकामनोहरम् ॥१०॥

विधिना जगत्त्रितयसृष्टये मुदं
हरता कृतेन सुषिरेण हारिणा ।
नवरोमराजिलतिकालवालभू-
वलयेन नाभिकुहरेण शोभितम् ॥११॥

दधतं पराक्रमजितैर्मृगाधिपैः
उपदीकृतामिव वलग्नयष्टिकाम् ।
जलदभ्रमोपगतविद्युदुज्ज्वल-
त्तपनीयचेलविलसत्कटीतटम् ॥१२॥

---

रमणीयतैव सुधाब्धिः ॥८॥

वदनं पद्मं, पद्मवल्ली गलं, कर्दमः कस्तूरिका । कौस्तुभोऽपि अमृतमथनकाले लक्ष्म्या सहोत्पन्नः ॥९॥

उपदीकृतां उपायनीकृताम् । वलग्नं देहमध्यभागो यष्टिकेव ॥१२॥

नवरत्नकोशगतनन्दकप्रभा-
शतमन्युचापशतचित्रिताम्बरम् ।
रसमानसारसनसारसावली-
लसमानमङ्गलनितम्बसैकतम् ॥१३॥

जघनस्थलप्रतिहतिद्विधाकृतां
इव रामणीयकतरङ्गिणीझरीम् ।
क्विदधानमूरुयुगलं सुराङ्गना-
कृतिमातृकाफलकमब्जजन्मनः ॥१४॥

मुनिकुञ्जरस्य ववृधेऽधिमानसं
प्रमदाम्बुराशिलहरीभरैश्चिरम् ।
मुमुदे च लोचनचकोरपत्रिणा
पुरतः स्फुरत्युरुतमोहरे विधौ ॥१५॥

अथ माधवं शुभतमालकाननं
महनीयगन्धवनमालिकोज्ज्वलम् ।
उपलभ्य कोकिलयुवेव कन्दलन्-
मधुरस्वरः समजनिष्ट देशिकः ॥१६॥

---

रसमानं शब्दायत् ॥१३॥

भगवत ऊरुयुगलात् ऊर्वशी जाता नरनारायणावतारे । ब्रह्मा तदेव ऊरुयुगलं अप्सरस्सृष्टचै मातृकाफलकत्वेन स्वीचकार । माणवकानां अक्षररेखाशिक्षणार्थं पुरतः स्थापितं कृष्णवर्णं फलकं मातृकाफलकं, यत्र आचार्य अ आ इति खटिकया विलिख्य माणवकाय अक्षररेखालेखनप्रकारं दर्शयति ॥१४॥

प्रमदः सन्तोषः । अधिमानसं मनसि मानससरसि च । उरुतमोहरो विधुश्चन्द्र इव भगवान् भाति । यं दृष्ट्वा चकोरो लोचनरूपः मुमोद ॥१५॥



श्रुतिमौलयोऽपि न विकुण्ठशक्तयः
प्रभवन्ति यस्य महिमानुवर्णने ।
तदशेषनायकभवत्पदाम्बुजं
कथय स्तवानि कथमल्पधीरहम् ॥१७॥

स्तुतिरुच्यते गुणगणस्य कीर्तनं
घटते न तद्भवति निर्गुणे विभौ ।
असतस्तु केवलममुष्य कीर्तनं
सरसायनं कथमिव स्तवोऽस्तु ते ॥१८॥

शरणागतं चरणपद्मयोरमुं
परिपालयेश कृपयैव केवलम् ।
समवेक्ष्य किञ्चिदुपकारमात्मनः
कुरुते महान्न खलु दीनरक्षणम् ॥१९॥

यदि नाथ दीनविषया भवद्दया
तदभीप्सितं मम करस्थितं भवेत् ।
मदपेक्षया किमपरोऽस्ति दैन्यभुक्
भुवनत्रयेऽपि ननु वेत्ति तद्भवान् ॥२०॥

सुकृतं त्वया न कृतमित्युपेक्षसे
यदि मां गतैव तव दीनबन्धुता ।

---

विकुण्ठशक्तयः कुण्ठितशक्तयः ॥१७॥

गुणिनिष्ठगुणाभिधानं स्तवः । स निर्गुणे न घटते । असतः अविद्यमानस्य अमुष्य गुणगणस्य । सरसायनं, सरसं अयनं सारस्यस्य सन्तोषस्य अयनं वा ॥१८॥

अपि चैतदीश भवतो व्यतिक्रमो
विपथान्वितंव ननु शास्ति बालकान् ॥२१॥

त्रिजगज्जनिस्थितिविनाशकल्पना-
धृतनैपुणीकनयनाञ्चलस्य ते ।
कियदस्ति मत्कभरणं कृपानिधे
किमुपेक्षसेऽतिसुलभं महद्यशः ॥२२॥

अथवा भरो भवतु मत्करक्षणं
करणीयमेव तदपि त्वया विभो ।
महतां परोपकृतये परिश्रमः
कुरुते महोत्सव इवाधिकां मुदम् ॥२३॥

अयि विश्वरक्षणविधानदीक्षिते
त्वयि नाथनं मम तु बालचापलम् ।
जनके दिशत्यपि फलादिकं क्रमात्
ननु रुद्यते मम ममेति बालकैः ॥२४॥

बहुभिः किमत्र वचसां प्रपञ्चनैः
अहमर्थये त्वदभयं सकृन्नतः ।
अविता तथाऽपि भविता न चेद्भवान्
भवतो व्रतक्षतिरये न किं भवेत् ॥२५॥

---

विपथानां सत्पथानानयनमेव, दीनोपेक्षणमेव तव व्यतिक्रमः मर्यादोल्लङ्घनरूपो दोषो भविता ॥२१॥

त्वत् त्वत्तः अभयं अर्थये । सकृन्नतः सकृदेव प्रपन्नायेति भवतो वचने प्रतिपत्त्या । व्रतक्षतिः-अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममेति गृहीतस्य व्रतस्य भङ्गः ॥२५॥



इति देवदेवनुतिपावनाननो
यतिशेखरो यतमना इतस्ततः ।
अतिपावनानि परितस्तपोवना-
न्यनघा नदीरभिययौ सरांसि च ॥२६॥

मधुरागमनम्

जनता हि तत्र कृतमालिकापगा-
जलपानजातजडिमापनुत्तये ।
रसनाञ्चले मधुरसं क्षिपत्यसौ
मधुरामवापदथ तामनुत्तमाम् ॥२७॥

कृतमालिकाकृतजलावगाहनः
क्रमशः क्रियाः समुचिताः समाचरन् ।
शतशः प्रणम्य शशिखण्डमण्डनं
मुखरोऽजनिष्ट मुनिशेखरो मुदा ॥२८॥

भगवन्नवाङ्मनसगोचरानहो
फणितुं भवद्गुणगणानशेषतः ।
चतुराननो न चतुराननोऽप्यतः
प्रभवेयुरीश कथमीदृशा जनाः ॥२९॥

जगदीश तावकगुणांशकीर्तना-
दपि भाग्यभाग्भजति विश्ववन्द्यताम् ।
जलदैः कियन्त्यपि जलान्युपाददत्
जलदो न किं व्रजति कीर्तनीयताम् ॥३०॥

---

मधुरसो नारङ्गः अम्लं फलम् । मधुररसाधिकवस्तुसेवनेन जातं जडिमानमपोहितु अम्लोपयोगः ॥२७॥

महिमाम्बुराशिलवमप्यजानतो
मम जायते तव गुणस्तुतिस्पृहा ।
मनसः प्रवृत्तिमयि मन्मथद्विषन्
नहि कोऽपि वारयितुमीश्वरो भवेत् ॥३१॥

अथवा गिरीश मम वाग्जगन्मयं
न भवन्तमर्चयितुमक्षमा भवेत् ।
किमु मीलतापि विशिखः प्रचोदितो
धरणीशरव्यमपराद्ध्यत्यये ॥३२॥

त्रिजगद्धुरन्धर कृपानिधे भवान्
अवतादमुं जनमनन्यजीवितम् ।
इति कन्दलत्प्रमदबाष्पगद्गदं
बहुधा निगद्य गिरिजालयं ययौ ॥३३॥

अथ तत्र सङ्घफलकाधिरोहिणो
द्रविडप्रबन्धपरदेवतात्मनः ।
कलशीकुमारकृतसूत्रवर्त्मना
कवयन्व्यजेष्ट कतिचित्कवीश्वरान् ॥३४॥

अधिहेमपुष्करिणि क्लृप्तमज्जनो
भसितत्रिपुण्ड्रपरिदीपितालिकः ।

---

यस्य भूमिरेव शरव्यं शरलक्ष्यं, स नेत्रे निमील्यापि शरं प्रचोदयितुं प्रभवति । धरणीरूपं शरव्यं वेद्धुं प्रचोदितः शरः वेद्धारं अपराधिनं न करोति । स्वयं भूमौ पतन् शरः लक्ष्यं प्राप्नोत्येव ॥३२।

द्रविडप्रबन्धाः तमिल्भाषागताः ग्रन्था एव परदेवतेति आत्मा मनो येषां तान्, संघफलकं शङ्कपलकं इति प्रसिद्धं, कलशीकुमार कृतसूत्रवर्त्मना अगस्त्यसूत्रानुसारेण तमिलभाषायां कवयन् ॥३४।



अभिवन्द्य मीननयनामसावभूत्
कवितात्मना परिणतात्मभक्तिकः ॥३५॥

कर्णोपान्तमणीकृतैन्दवकलानिर्यत्ननिर्यत्सुधा-
कल्लोलावलिमेलनद्विगुणितप्रत्यग्रशैत्योदयः ।
कारुण्यामृतवाहिनीनवपरीवाहप्रियंभावुको
मीनाक्ष्याः कुशलानि कोरकयतान्मुग्धः कटाक्षांकुरः ॥

ताटङ्कस्य परिस्फुरत्परिसरे तादृक्षरत्नत्विषो
मार्तण्डान्तिकखेलमानयमुनामाहात्म्यपाटच्चरः ।
शोणाश्माहितशाणकोणविलसन्मारास्त्रशङ्काकरो
मीनाक्षि त्वदपाङ्ग एष भवतान्मोदाय खेदापहः ॥३७॥

प्रेमाधिक्यधृतद्विपाननरदप्रोत्कीर्णताटङ्कक-
प्रालेयद्युतिमण्डले प्रकटयन्प्रायः कलङ्कश्रियम् ।
व्यातन्वन्नपि चादरादभिसरद्दर्शत्रियामाभ्रमं
मीनाक्ष्याः करुणाकटाक्षमहिमा मोहापहो जायताम् ॥

बन्दीकृत्य बलाद्यदीयरुचिभिर्लीलावतंसच्छलात्
नीलाम्भोरुहमञ्जरीविनिहिता कर्णाग्रदुर्गाञ्चले ।
वल्गल्लोचनखञ्जरीटयुगलीबालाङ्कुरश्रीकरः
पर्याप्तं नयनाञ्चलो दिशतु मे भाग्यं सुमीनाक्षि ते ॥

चिल्लीकैतवपुष्पसायकधनुर्वल्लीगुणः कामजि-
च्चेतःपेटकवर्तिधैर्यमणिसंमोषक्रियाकुञ्चिका ।

---

मार्तण्डस्य पुत्री यमुना । शोणाश्मना पद्मरागरत्नेनाहितः कृतः शाणः निकषोपलः, तस्य कोणे विलसतः तीक्ष्णतासंपादनाय इतस्ततः चलतः, मारास्त्रस्य शंकाकरः ॥३७॥

वक्त्राम्भोरुहरामणीयकसुधापाथोधिनारायणः
काङ्क्षापूर्तिकृदस्तु मीननयने कान्तः कटाक्षस्तव ॥४०॥

हालाहालमरीचिकासहचरः कण्ठस्थले धूर्जटेः
मध्ये फालतलं दृगन्तरुदयद्धूम्यांकुरश्रीकरः ।
मौलौ दिव्यधुनीमिलत्तरणिजाकल्लोलशङ्कावहो
मुग्धे देवि दृगञ्चलस्तव मुहुर्मौखर्यमाविष्क्रियात् ॥४१॥

कार्ये हेतुगतो गुणस्समुदगेदित्युच्चकैर्भाषिणः
पश्यत्पादमताध्वजांघिकधियो मिथ्यागिरः कल्पयन् ।
नैल्याद्वैतवदावदोऽपि हृदि यो रागं विधत्ते विभोः
सोऽयं देवि दृगञ्चलस्तव चिरं सौख्यानि देयान्मम ॥४२

मारच्छद्मवनेचरः श्रुतिपुटीरन्ध्रापदेशावटं
सञ्छन्नं विरचय्य यच्छविमृषा तापिञ्छनव्यच्छदैः ।
पश्यत्फालमनोभिधानहरिणं चर्कर्ति सद्यो वशे
सौभाग्यं शफरीदृशो दिशतु मे सोऽयं कटाक्षांकुरः ॥४३॥

यच्छायाभररूपनीलपटिकामास्तीर्य गण्डस्थला-
भोगाकारवणिक्पथे स्मरवपुस्सांयात्रिकाविष्कृताः ।
द्योतन्ते परभागमेत्य हसितज्योत्स्नात्ममुक्तालयो
मीनाक्षि त्वदपांग एष तनुतां मेदस्विनीं मे मुदम् ॥

---

कार्ये कारणगुणः समन्वयेत् इति पश्यत्पादस्य अक्षपादस्य मतानुयायिनः मताध्वजांघकधियः । नैल्याद्वैतं केवलं नैल्यं, तद्वदावदः तत्प्रकटयिता दृगंचलः परमेश्वरहृदि रागं रक्तिमानं अनुरागं विधत्ते । नीलाद्रक्तमुत्पद्यते इति नैयायिकमतविरुद्धम् ॥४२॥

पश्यत्फालः निटिलाक्षः शंभुः ॥४३॥



भंगो भृङ्गगणस्य येन नियतं भद्रासनाध्यासनं
न्यक्कारो नवनीलनीरजरुचां न्यायामृतं वैभवम् ।
शिक्षा मारशिलीमुखस्य शिरसि क्षीराभिषेकोत्सवः
श्रीमान्कन्दलयत्वपांगमहिमा श्रेयांसि मीनाक्षि ते ॥

शौनासीरमणित्विषो गुणनिका तापिञ्छगुच्छच्छवेः
पर्यायो मधुपश्रियां परिणतिर्वीप्सातसीरोचिषाम् ।
कालिन्द्याः पुनरुक्तिरुत्पलमहस्स्तोमस्य चाम्रेडनं
दौर्गत्यं शफराक्षि मे तव दृशोर्दूरीक्रियादञ्चलः ॥४६॥

नैराकांक्ष्यवदावदः श्रुतिपुटे नीलांबुजन्मश्रियः
ताटंके बलवैरिनीलमहसां नैराश्यमंकूरयन् ।
वैतथ्योक्तिषु कज्जलस्य च दृशोर्वाचालभावं वहन्
सोऽयं मे शफरीदृशो वितरतात्सौख्यं कटाक्षांकुरः ॥

कस्तूरीद्रवकल्प्यमानमकरीचातुर्यमुल्लासयन्
सातत्येन कपोलयोर्विरचयन् कर्णोत्पलालिश्रियम् ।

---

नीलपटोपरि मुक्तां आस्तीर्य विक्रयणं वणिजां निसर्गसिद्धम् । मुक्तायाः कान्तिवर्धनं तेन जायते ॥४४॥

भृङ्गगणस्य भङ्गः पराभवः येन कटाक्षमहिम्ना संपन्नः, तेनैव मम भद्रासनाध्यासनं सिंहासनारोहणं संपन्नम् । येन नवनीलनीरजरुचां नीलोत्पलकान्तीनां न्यक्कारः, तेनैव न्यायेन ज्ञानेन अमृतं अनश्वरं प्रभुत्वं संपन्नम् । येन मारास्त्रस्य शिक्षा कृता, तेन मम क्षीराभिषेकोत्सवः क्रियते ॥४५॥

कटाक्षेणैव नीलशोभालहर्या लाभात् श्रोत्रयोः नीलोत्पलस्य ताटङ्कयोः इन्द्रनीलमणेः, नेत्रयोः कज्जलस्य चापेक्षा नोदेति ॥४७॥

तन्वन्नीलसरोजदामसुषमानिर्णिद्रतां कैशिके
श्रीमीनाक्षि शुभानि मे कलयतान्मुग्धः कटाक्षांकुरः ॥

अनुदिनमिति देवीमर्चयन्वाचप्रसूनैः
अविरतसुमरोच्चैस्सौरभीसौलभीकैः ।
निगमशिखरचिन्तानिर्वृतो निर्व्यलीकैः
बहुदिनमिह वासं बह्वमंस्तार्यपादः ॥४९॥

इति दन्तिद्योतिदिवाप्रदोपाङ्क–सत्यमङ्गलरत्नखेटश्रीनिवासदीक्षित-
तनूजस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरगुरुचरण सहजता-
लब्धविद्यावैशद्यस्य राजचूडामणिदीक्षितस्य कृतिषु
शङ्कराभ्युदये काव्ये पञ्चमः सर्गः ।

# षष्ठः सर्गः

## दर्भशयनयात्रा

शेखरोऽथ यमिनां सहानुगैः सेतुदर्शनकुतूहलाद्व्रजन् ।
सिन्धुबन्धुतटसीम्नि राघवं दर्भपूलकृततल्पमस्तुत ॥१॥

नित्यमेव निजमण्डलान्तरे बिभ्रति प्रणयतो विवस्वति ।
भूषयन्भुवननाथ तत्कुलं भूतलं दशरथादवातरः ॥२॥

निर्दयं गुरुगिरा पुराजनौ निघ्नता स्वजननीमपि त्वया ।
न व्यधायि पुरुषादिनीवधे हन्त नाथ करुणेति नाद्भुतम् ॥३

वैरमंकुरयितुं किमम्बुधौ वीरराक्षसकृते न्यमज्जयः ।
मानवास्त्रमयपाशसन्दितं ताटकातनयमेव मारिचम् ॥४॥

स्वीयवंशजनुना त्रिशंकुना सोयमध्वरमकारयत्पुरा ।
इत्युदीतमतिरीश याजयन् कौशिकं कलयसे कृतज्ञताम् ॥५॥

ऊरुरुज्ज्वलगुणामजीजनन्मानिनीं मघवमोहिनीं पुरा ।
इत्युदीर्ष्यमिव ते पदांबुजं तादृशीमजनयत्तलोदरीम् ॥६॥

---

सूर्यः स्वमण्डलमध्ये नित्यमेव मां बिभर्ति इति प्रणयेन तत्कुले अवततार ॥२॥

पुराजनौ परशुरामावतारे ॥३॥

वीरराक्षसकृते रावणादीनां वध्यानां कृते वैरं अंकुरयितुं मारीचं बीजभूतं जले न्यमज्जयः ॥४॥

पुरा ऊरुः उर्वशीमजनयत् नारायणावतारे, इतीर्ष्यया इदानीं पदं अहल्यामजनयत् ॥६॥

गौतमस्य गृहिणी विभो भवत्पादपङ्करुहतः पवित्रिता ।
इत्युदञ्चति न विस्मयो जगत्पावनी तदुदिता वियद्धुनी ॥७॥

धन्ववर्यमपि तन्वति त्वयि प्राप्तभंगमधुना घनप्रभे ।
सीतयोदितशुभांकुरश्रिया सद्य एव समभावि राघव ॥८॥

मैथिलीपदतलं मणीशिलां मङ्गलार्थमधिरोपयन् भवान् ।
पादरेणुमहिमानमामृशन्नस्तशङ्कमवदन्मनुं किमु ॥९॥

इक्षुदण्डमिव खण्डयन्भवान् इन्दुखण्डमकुटस्य कार्मुकम् ।
तद्विनेयधनुषोऽधिरोपणात् कीर्तिमीश कियतीमवाप्स्यसि ॥१०॥

जानकी हरशरासकर्षणात् जानती निजकरग्रहोत्सवम् ।
तद्विनेयविशिखासरोपणे त्वामवेक्षततमां किमीर्ष्यया ॥११॥

---

पादपद्मभवा गंगा जगत्सर्वं पावयतीति अहल्यायाः पवित्रीकरणं न विस्मयावहम् ॥७॥

घनप्रभो मेघाभः, धन्व मरुप्रदेशो धनुश्च । घनो यथा धन्वप्राप्तभंगं करोति तथा त्वमपि । धन्वप्रदेशे वृष्ट्या पुष्टे सीतया हलमुखेन शुभांकुरश्रीः सद्यः संपद्यते, भग्नधनुषि त्वयि सीतया उदितशुभांकुरया समभावि ॥८॥

सीतायाः पादतलं अश्मानमारोपयन् राघवः "अश्मानमारोह अश्मेव त्वं स्थिरा भव" इति मन्त्रमवदत् । मन्त्रमहिम्ना सीताया अश्मतापत्तौ किं करणीयमिति तस्य शङ्कैव नोदिता, यतः स तदा स्वपादतलमहिमानं शिलाया अहल्यात्वापादकं आमृशन्नेव पादमश्मन्यारोपयत् ॥९॥

शिवादधीतधनुर्वेदः परशुराम इति शिवशिष्यः ॥१०॥

शिवधनुर्भंगात् अहं सीता प्राप्ता । वैष्णवधनुर्भंगात् काप्यन्या राममहिषी संपद्येत वेति ईर्ष्यया ॥११॥



वत्स साधय वनाय मौनिनां इत्यधीश गुरुणा समीरितः ।
त्वं गतस्तदवनाय तज्जनैः कीर्त्यसे गुरुनियोगकृत्कथम् ॥१२॥

हन्त काकहतकस्य लोचनं विद्धमस्तु भवता तृणाग्रतः ।
मोचनेन पुनरस्य मोदवान् कौशिको वद कुतः कथं नु वा ॥

आसिकां धुरि दशाननस्वसुः नासिकामपि न सोढवानसि ।
आशरानपि खरान्सदूषणान् आतनोस्त्वमखरानदूषणान् ॥१४॥

राम हेमहरिणार्भकग्रहे हा तवापि वितथः श्रमोऽभवत् ।
कांक्षितं भुवि लभेत को नु वा काननेषु मृगतृष्णया भ्रमन् ॥

राज्यसंपदि विसृज्य रागितां काननैककृतजीवनोऽपि सन् ।
राम हेममृगतृष्णया जनस्थानसीमनि कुतोऽकृथाः श्रमम् ॥१६॥

मुक्तमाशु कलयन्कबन्धमुन्मूलितार्कभवतापवैभवः ।
देव मारुतसहायवान्भवान् दक्षिणां दिशमगाद्घनोपमः ॥१७॥

---

वनाय साधयेति पित्रोक्तं, त्वं तु अवनाय (रक्षणाय) गतः इति किमेतत् पितृवाक्यपालनम् ? ॥१२॥

काकहतकमोचनं कौशिकस्य काकशत्रोरुलूकस्य न तोषाय । अत्र तु कौशिको मुदमाप । कौशिक इन्द्रः काकरूपजयन्तस्य पिता ॥१३॥

दशाननस्वसुः शूर्पणख्याः धुरि आसिकां पुरतः स्थितिं न सोढवान्, न वा नासिकां सोढवान् । अत एव कर्तितवान् । खरान् खरप्रभृतीन् दूषणादियुतान् न सोढवान् । परं युद्धे मृतानां अपगर्वाणां देवत्वापादनेन अखरान् सौम्यान् अदूषणान् दूषणरहितान् आतनोः ॥१४॥

पूर्वं राज्यसंपदि जनमध्यवासे संपदि च रागिता त्यक्ता । अधुना जनस्थानसीमनि वासोऽङ्गीकृतः । हेममृगे तृष्णा अधुना इत्येतत्कुतः? ॥

भवान् घनोपमः । घनः कबन्धं उदकं मुक्तं करोति, भवान्

वालिनं बलिनमप्युपेक्ष्य यद्वासराधिपसुतेऽकृथा दयाम् ।
भावयाम्यमिहोपधिं प्रभो भानुवंशजनिमेव तावकीम् ॥१८॥

भाविसेतुकृतये पयोनिधौ राम पालयितुमेव रंहसा ।
दूरमग्रचरणेन दुन्दुभेः कायमायतमुदक्षिपद्भवान् ॥१९॥

साधु वल्कमपि सप्ततामभी बिभ्रतं किमु विडम्बयन्ति माम् ।
इत्युदीर्ष्य इव भूरुहो भवान् गाढमेवमभिनच्छरेण किम् ॥

निर्दलय्य नगमेककं पुरा हंसचारमकृथाः क्षितौ परम् ।
सप्त तान्सपदि पाटयन्यशोहंसचारमधुना जगत्त्रये ॥२१॥

मारुतावृतमहेषुरन्ध्रभूमन्द्रकन्दलितसैकषट्स्वरा ।
त्वद्यशोभरमशेषशोभनं सप्तसाल्यनिशमीश गायति ॥२२॥

---

कबन्धनामानं मुक्तमकरोत् । घनः सूर्योत्थतापमुन्मूलयति, भवान् सूर्यभवसुग्रीवतापं उदमूलयत् । स मारुतसहायः, भवान् वायुसुत-हनुमत्सहायः ॥१७॥

उपधिर्व्याजः । बली वाली, न तथा सुग्रीवः । वंशपतिसूर्य-पक्षपाती सूर्यसुतं अपालयः ॥

साधु वल्कः वल्कलः, शोभना त्वक् च । सप्तता सजटत्वं सप्त-संख्याकत्वं च । सटा जटा ॥२०॥

पूर्वं एकं नगं पर्वतं मन्दरं निर्दलय्य स्थानान्निर्भिद्य हंसचारं गरुडनीतं अकृथाः अमृतमथनार्थे । अधुना तान्नगान् वृक्षान् सप्त तालान् पाटयन् यशोहंसचारमकृथाः ॥२१॥

महेषुणा कृते रन्ध्रे मारुतेनावृते उत्पन्नाः सैकषट्स्वराः सप्त-स्वराः यस्यां सा सप्तसाली सप्तानां सालानां समूहः ॥२२॥



वालरोमवशगाशरप्रभोर्वालिनो लघु भुजान्तरान्तरे ।
बाणतो विघटिते त्वयि द्विषां गाढमाप घटितारर पुरम् ॥

भ्रातृवत्सलतया तमप्यवन्पाकशासनिमुपेन्द्र वायसम् ।
वालिनं त्वमपराधवर्जितं निर्दयं निहतवान्कथं प्रभो ॥२४॥

त्वद्भटेन पुरतोरणस्थितिं तन्वताऽनिलतनूभुवा द्विधा ।
अक्षहीनमयमाशराग्रणीः स्वं व्यबुद्धचत सुते मृधे हते ॥२५॥

राज्यदानविधिनाऽग्रजन्मनः प्रेमभाजनतया च तादृशा ।
ईश कीशसदसामधीशितुः निर्विशेषमकृथा विभीषणम् ॥२६॥

ईदृशं शयनधाम नेतरत्सङ्घटेत युगसंक्षये मम ।
इत्यतस्स सरितां किमीशिता नाशितो न भवता शरार्चिषा ॥

सायकस्तव समुद्रचूषणे कौशलं किमपि कूलमुद्रुजम् ।
कुम्भसम्भवतपोधनान्तिके किन्नु राघव वसन्नुपाददे ॥२८॥

---

पुरा वालिना आशरप्रभुः रावणः वालरोम्णा बद्धः । गाढं घटितारर दृढतया बद्धकवाटं रामाद्भीतेः ॥२३॥

उपेन्द्रः अदितेरिन्द्रानुजत्वेन जातः । भ्रातरि इन्द्रे वात्सल्येन जयन्तं काकमरक्ष इति चेत्, वालिनं कुतोऽवधीः, सोऽपि इन्द्रसुतः किल ? ॥२४॥

तोरणं बहिर्द्वारम् । द्विधा तन्वता, भिन्दता । पुरतः रण-स्थितिं रणेऽवस्थानं द्विधा बहुप्रकारं तन्वता, अक्षहीनं अक्षाख्य-सुतहीनं नेत्रहीनं च ॥२५॥

कीशसदसामधीशिता सुग्रीवः ॥२६॥

कूलमुद्रुजं कूलङ्कषं अतिशायितम् ॥२८॥

वायसेऽपि वनिताकृतागसि प्रागहो विहितवान्दयामिति ।
अम्बुराशिरपराधवानपि त्वां समाश्रयत किं दयानिधे ॥२९॥

त्वत्पादाब्जभजने विलम्बनात्तोयराशिमपराधिनं विधिः ।
सेतुदण्डमुदरे निपातयन् साधु पीडयति सारवं मुहुः ॥३०॥

चन्दनाचलतटीगुहागृहाच्चर्वितुं किल सुवेलदर्दुरम् ।
चञ्चलत्फणधरस्य चातुरीं अञ्चतीश तव सेतुरम्बुधौ ॥३१॥

सेतुरेष तव भोगिराट्पुरीसाल एव जलधौ समुच्छ्रितः ।
अन्यथा न पुनरस्य सर्वथा सङ्घटेत कपिशीर्षसङ्गतिः ॥३२॥

फेनपंक्तिसिचयाञ्चितो यशःकेतुरीश किमु सेतुरेष ते ।
चारुपुष्करविसारिशीकरः चन्दनाद्रिकरिणः करो यथा ॥३३॥

चन्दनाचलमहेभपादभूलन्दिता सपदि सेतुशृङ्खला ।
किं त्रिकूटगिरिकूटदन्तिनो बन्धनाय भवता प्रसारिता ॥३४॥

---

सेतुरूपं दण्डं उदरे पातयन्, तदुत्थवेदनया सारवं साक्रन्दं पीडयति ॥३०॥

सुवेलो नामाचलो लंकास्थः ॥३१॥

सालः प्राकारः पत्तनदुर्गभूतः। तदुपरि कपिशीर्षाकृतियन्त्रघटना आरोहच्छत्रुविध्वंसनाय । अत्र कपयः कृतसेतवो विश्रान्ताः शेरते । शयानानां कपीनां शीर्षसंगतिः सेतोः सालोपरिघटितकपिशीर्षयन्त्रात्मना उन्नीयते ॥३२॥

त्रिकूटाख्यगिरिकूटो दन्ती । दुर्दान्तस्य गजस्य ग्रहणाय परिचितेन गजेन साकं पादयोः शृङ्खलया बन्धन क्रमेण विनयनं च हस्तिपैः क्रियते ॥



स्वीयपार्श्वचलफेनपक्षतिः सेतुबन्धतुहिनाचलात्मजः ।
त्वत्कटाक्षलवलाभलोभतस्तोयधेरुदयमाससाद किम् ॥३५॥

योजनाः कति विलङ्घिताः पुरा योगिना हनुमतेति वेदितुम् ।
मर्कटैस्तव भटैर्निपातितो मानदण्ड इव सेतुरेधते ॥३६॥

वीर तावकशरेण पाटितो वेधसा सुघटितो महीपटः ।
दन्तुरा यदिह दृश्यतेऽन्तरे कापि सेतुकपटेन रेखिका ॥३७॥

सागरः सगरवंशभूमिभृत्कीर्तिजैत्रपटहः किल प्रभो ।
मौखरीबधिरदिङ्मुखो भवत्सेतुकोणघटनेन जायते ॥३८॥

त्वत्कसेतुमणियष्टिकाधरस्तत्तथोमिति च गर्जितैर्गृणन् ।
सागरः सगरमेदिनीविभोः किन्नु नर्तयति कीर्तिनर्तकीम् ॥३९॥

आशरानहह वीक्ष्य यान्पुरा याः किलेन्द्रसुदृशो ययुर्भयम् ।
ताभिरेव समिति स्वयं वृतास्तन्तनीति सपदि स्म तान्भवान् ॥

---

तुहिनाचलात्मजो मैनाकः ॥३५॥

मह्यां आच्छादनवस्त्रभूतः समुद्रः शरेण पाटितः । विषमं पाटनेन दन्तुरता दृश्यते ॥३७॥

समुद्रः सागरवंशकीर्तिपटहः । स सेत्वाख्येन कोणेन दण्डेन हन्यते । मौखरी शब्दसन्तानः, तया दिङ्मुखा बधिरीकृताः ॥३८॥

सूत्रधारः सागरः, सगराणां कीर्तिर्नर्तकी, सूत्रकारहस्ते सेतुरूपा रत्नयष्टिः ॥३९॥

राक्षसेभ्यो भीताः सुरस्त्रियः, अधुना रामेण हतत्वात् देवभावं आपन्नांस्तानेव स्वयं वरयन्ति पतित्वेनेति चित्रम् ॥४०॥

अस्तरावणमदार्जुनद्रुहं भार्गवञ्च भगवन्निरस्यतः ।
कीर्तये न तव रक्षसां जयं किं हरिश्शशवधेन शस्यते ॥४१॥

रामेश्वरागमनम्

इत्थं ककुत्स्थनृपतिस्थपतेर्यशांसि
संकीर्तयन्नघहराणि स संयमीन्द्रः ।
सिन्धौ निमज्ज्य सहपर्वतवर्धनीकं
श्रीरामनाथमभिनन्द्य ततस्तमस्तौत् ॥४२॥

उद्दण्डैर्दशकण्ठबाहुपरिघैरुत्क्षिप्यमाणो हठात्
कैलासो निजवामभागसभयोत्कंपाधिकोद्यत्क्रुधा ।
येनाङ्गुष्ठविपीडनत्रुटदसोमेदोवसालेपनात्
सद्यस्संघटितोऽजनिष्ट स भवान्निःश्रेयसायास्तु नः ॥४३

मरकतमणिमांसलांशुजालः
क्वचिदितरत्र भवान्प्रवालशोभः ।
युगपदुदितशर्वरीदिनश्रीः
शिव कुरुषेऽर्ध इति श्रुतिं यथार्थाम् ॥४४॥

---

रावणोऽर्जुनेन कार्तवीर्येण जितः । अर्जुनश्च परशुरामेण हतः । परशुरामश्च भवता जितः । भवदग्रे रावणः शशः ॥४१॥

कैलासो रावणेन उत्क्षिप्तः शतशो भिन्नः । शिवेन स्वांगुष्ठाग्रनिपीडनेन रावणदोःपेषणं कृत्वा ततः प्रवहतोः मेदोवसयोः लेपेन कैलाससंघटना कृता ॥४३॥

शर्वरीश्रीः चन्द्रः, दिनश्रीः सूर्यः । श्रुतिर्जनश्रुतिः "द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् । अर्धेन नारी" (मनु. 1-32) ॥४४॥



इति विहितनुतिर्गिरीशचूडा-
शशिकिरणापसरत्तमःप्ररोहः ।
त्रिचतुरदिवसान्वसन्निहासौ
मुनिपतिरुत्तरदिङ्मुखः प्रतस्थे ॥४५॥

इति दन्तिद्योतिदिवाप्रदोपाङ्क—सत्यमङ्गलरत्नखेटश्रीनिवासदीक्षित-तनूजस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरगुरुचरण सहजता-लब्धविद्यावैशद्यस्य राजचूडामणिदोक्षितस्य कृतिषु
शङ्कराभ्युदये काव्ये षष्ठः सर्गः ।

# सप्तमः सर्गः

## कावेरीतीरयात्रा

अथाप्लुतः संप्रति नूपुरापगासदानदीमातृकशक्रनिष्कुटे ।
वृषाचले वीक्ष्य स सुन्दरं हरिं शनैरयं सह्यसुतामुदैक्षत ॥१॥

समीरणालोलसरोजवाटिकानितान्तनिष्यन्दिमरन्दनिर्झरैः ।
पदे पदे या परिवृद्धिमेयुषी प्रयाति लोकेषु मरुद्वृधाभिधा ॥२

सुधारसस्वादिमधिक्रियाकृतः
स्वपाथसो वैवधिकैः सुधान्धसाम् ।
विलम्बिताग्रैः फलभारभंगुरै-
र्विराजते या तटकेरभूरुहैः ॥३॥

सुधारसस्यास्य च भो सुधान्धसः
समीक्ष्यतां तारतमीति या स्वयम् ।
उदस्तकेरद्रुभुजोच्चकैर्दिश-
त्यदःफलेष्वंबु गृहीतमात्मनः ॥४॥

प्रशस्तचिक्रोटकदष्टयत्तटप्ररूढकेरद्रुफलाम्बुनिर्झरैः ।
प्रसर्पिणी सत्पथसीम्नि सारिणी सुरस्रवन्तीत्यभिमन्यते सुरैः ॥

---

वृषाचलः अळगर्मलै इति प्रसिद्धो मधुरान्तिकस्थो दिव्यदेशः । नूपुरापगा नूपुरगंगा । सह्यसुता कावेरी ॥१॥

वैवधिकाः जलवाहकाः । स्कन्धे उभयतो दण्डलंबिनौ जलपूर्णौ कलशौ वहन् वैवधिकः ॥३॥

चिक्रोटकः श्वजात्यो वृक्षारोही मर्कटसदृशः । (भाषायां मरनाय्) सत्पथं वियत् ॥४॥



अजस्रसस्यास्थितरोचिषि क्षमासुधावधूमूर्धनि चोलसीमनि ।
चकास्ति या सारसधूलिधूसरा मनोज्ञसिन्दूरमयीव रेखिका ॥

## श्रीरङ्गक्षेत्रगमनम्

द्विधाभवन्त्याऽथ कवेरकन्यया दृढोपगूढे धुरि रङ्गमन्दिरे ।
असौ निमज्जन्नधिचन्द्रपुष्करिण्यहीन्द्रतल्पं हरिमित्यवन्दत ॥

पितामहस्यापि पितामहो भवान्
प्रभो न किञ्चिद्भवतोऽस्ति कारणम् ।
बिभर्ति रूपाणि बहून्यपि स्वयं
जनावनैषी जगदीश मायया ॥८॥

पुराणवाणीमपहृत्य वारिधौ
पुरा मुरारे दनुजे तिरोहिते ।
कटाक्षवीक्षोपचितात्मभूर्भवान्
रमाक्षिलक्ष्मीमवहत् झषाकृतिः ॥९॥

परिभ्रमन्मन्दरघर्षणोदय-
त्किणोपमैर्बिन्दुभिरङ्किताकृतिः ।
सुधान्धसां स्वस्तिनिमित्तमादधे
पयोधिकन्याप्रपदश्रियं भवान् ॥१०॥

पयोधिकन्याकुचपर्वतद्वयी-
भरं विसोढुं खुरलीपरिश्रमम् ।

---

पितामहस्य ब्रह्मणः पिता पद्मं तत्पिता ॥८॥
रमाक्षिलक्ष्मीमवहत् - रमया सप्रेमदृष्टः ॥९॥
कूर्मपृष्ठजयिष्णुप्रपदान्विता लक्ष्मीः ॥१०॥

विधातुकामो नियतं विभो भवान्-
बभार किं मन्दरमंभसांनिधौ ॥११॥

कठोरघोणाहतिभिर्द्विषत्तनुं
दिशासु मुस्तामिव धुन्वतस्तव ।
रदाग्रलग्ना जलराशिपल्वले
क्षमा दधौ कर्दमलेशविभ्रमम् ॥१२॥

भवन्नखांकूरमयूखकन्दले पुरा निमग्ने दनुजाधिपोरसि ।
व्यपेतसंव्यानदुकूलपल्लवा किल ह्नियाऽतिष्ठत नासुरेन्दिरा ॥

पुरा वलारातिमुखामरावलीहिताय बल्याहरणे दृढव्रतः ।
पलाशदण्डप्रणयी वटुर्भवन् पदक्रमासक्तरुचिर्भवानभूत् ॥१४॥

बलिस्त्रिलोकीं भवते दिशन्नपि
व्यधत्त मन्युं विधिचोदितो यतः ।
फलप्रदेनाखिलकर्मणां ततः
प्रसह्य पातालतले कृतस्त्वया ॥१५॥

---

खुरलीपरिश्रमः वीरोचितव्यायामः ॥११॥

असुरलक्ष्मीः दनुजाधिपोरसि पाटिते व्यपेतोत्तरीया ह्रीणा नातिष्ठत - न संमुखेऽतिष्ठत न कमप्याशयं प्राकटयत् । प्रकाशनस्थेयाख्ययोश्चेत्यात्मनेपदम् ।

ब्रह्मचारी देवानां कृते बलिमाहरति, पलाशदण्डे प्रणयवान्, वेदसंहितायाः पदक्रमपाठे रुचिमांश्च। अयं वामनो ब्रह्मचारी, बलेः तन्नामकासुरस्य आहरणे जये दृढव्रतः, पलाशानां मांसादानां राक्षसानां दण्डे यमने दृढव्रतः, पदत्रयेण विश्वाक्रमणे आसक्तरुचिः ॥१४॥



वरूथिनीपादरजोभिरंबरं वितन्वतो भूमितलं दुरीश्वरान् ।
कुठारतेजोजलदान्प्रकल्पयन् व्यधत्त नक्षत्रपथं भुवं भवान् ॥

क्षणेन शस्त्रक्षतमेदिनीभृति त्वयीश तादृग्भृगुवंशमौक्तिके ।
अभावि धात्र्या व्यपराजहंसयाऽप्यहो विराजत्तरराजहंसया ॥

करोदरे यस्य निशाचरप्रभोः गिरीशशैलेन च कन्दुकायितम् ।
शिरांसि तस्यापि भवज्जयश्रियः प्रपेदिरे कन्दुकतां रणाङ्गणे ॥

प्ररूढवेलाटविशिञ्जिनीतते प्रभो पुरा वारिधिकूलकार्मुके ।
निहन्तुकामेन निशाचरप्रभुं नियोजितः सेतुशिलीमुखस्त्वया ॥

मुकुन्द हालाहलसादरोऽपि सन्
भवानुपाश्रित्य तु कामपालताम् ।
निनाय धात्रीं बत विप्रलम्भतां
द्विषद्वधूनामपि कुन्तलावलिम् ॥२०॥

---

आकाशं सेनापादरजोभिर्भुवं व्यतन्वन् दुरीश्वराः । भवांस्तु कुठारतेजोरूपान् जलदान् प्रकल्पयन् वृष्ट्या शान्तरजस्कां भुवं नक्षत्रपथं आकाशं अकरोत् अर्थात् क्षत्राणां क्षत्रियाणां पन्था एव न विद्यते यत्र तथा अकरोत् ॥१६॥

धात्री भूमिः व्यपराजहंसाऽपि निःक्षत्रियापि, विराजत्तरराजहंसा बभूव । राजहंसा मानससरस्थाः हंसाः ॥१७॥

हाला मदिरा, हलः लाँगलं, तयोः सादरो बलरामः, हालाहले विषे सादरः शंभुः । कामपालो बलरामः । शंभुरपि कामपाल इति विरोधाभासः, बलरामः कुरुषु कोपेन हस्तिनापुरीं विदार्य गंगायां पातयितुं उद्युक्तेति भागवते ॥२०॥

उरीकृताभीरकिशोरवत्सका-
कृतिर्भवान्वञ्चयितुं विरिञ्चनम् ।
श्रुतिप्रतीतां चिदचित्स्वरूपतां
स्फुटीकृतामीश पुरा व्यतन्तनीत् ॥२१॥

अनादिनाप्याबधतेश सादितां
त्वयाधिरूढस्त्वरितस्तुरङ्गमः ।
कलेरपाये कृतघासकौतुको-
ऽप्यघाससंसक्तमना भविष्यति ॥२२॥

इति स्तुतिप्रीणितरङ्गनायको
भजन्क्रमात्पञ्चनदेश्वरादिकान् ।
समाश्रितो द्वारवतीमनुत्तरां
स राजगोपालमवन्दत स्तुवन् ॥२३॥

अभूषयं सन्ततिमुष्णदीधितेः
अहं पुरेत्याहितधीरधीश्वर ।
विभूषयत्यद्य विधोः कुलं भवान्
दृशोः क्वचिन्नो ममता खलूचिता ॥२४॥

क्रमात्पुराजन्मयुगेऽपि किं प्रसूसुकेतुजासूदनवासनावशात् ।
अनीक्षमाणेन घृणादृशाऽप्यहो हता त्वया पूतनिकावधूरपि ॥

सादिता अश्वारोहिता, घासः तृणं; अघानां आसे निरसने संसक्त-मनाः कल्किरूपेण ॥२२॥

द्वारवती दक्षिणद्वारकेति प्रसिद्धा मन्नारगुडी नगरी ॥२३॥

रामावतारे सूर्यवंशं कृष्णावतारे चन्द्रवंशं च विभूषयति । चन्द्र-सूर्यौ नेत्रे भगवतः । तयोः अन्यतरस्य ममता ममैव वम्शं व्यभूषय-दित्यभिमानो माभूदिति ॥२४॥



कराम्बुजातं करजाङ्कुशस्फुट-
त्तनुं तनोति स्म पुरा सुराहितम् ।
इतीर्ष्यया त्वच्चरणाम्बुजं ध्रुवं
विलासघातैः शकटं व्यसुं व्यधात् ॥२६॥

पुरन्दराराति शरात्मतां गताः पुरा बभूवुर्भुजगा इति ध्रुवम् ।
तदीयजातौ सरुषांबुवासो हतस्त्वयामर्दि च हन्त कालियः ॥

उदूढतत्तादृशमन्दरोर्वराभृतो गभीरे पयसां निधौ तव ।
मुकुन्द गोवर्धनभूभृदुद्धृतिर्मनस्सु नः स्मेरयते न विस्मयम् ॥

तवेश धत्ते पठितैकपाठता तदुग्रबाणासनदण्डखण्डनम् ।
करेणुरुन्मस्तकरेणुरप्यरेः करेऽणुरासीदिति नाद्भुताय नः ॥

द्विपेन्द्रसंरक्षणदीक्षितो भवान्
द्विपेन्द्रमीश द्विषतोऽवधीत्कथम् ।
तवाथवा तादृशसिंहनाटिका-
महानटस्येदमवैमि सांप्रतम् ॥३०॥

प्रसूः रेणुका परशुरामावतारे । सुकेतुजा ताटका रामावतारे । 'विबुध्य तां-बालकमारिकाग्रहं चराचरात्माऽऽस निमीलितेक्षणः' इति भागवते ॥२५॥

पूर्वं करः हिरण्यकशिपुमवधीत् करजैः तत्तनुं भिन्दन् । इदानीं चरणौ विलासघातैः शकटासुरमिति विशेषः ॥२६॥

पुरा भुजगाः पुरन्दराराते: इन्द्रजितः शरा नागास्त्ररूपा अभवन् इति रुषा अद्य कालियो मर्दितः किम्? ॥२७॥

कमठरूपेण जले कुलपर्वतं मन्दरमुद्धृतवतः कियानयं भूमि-मधिष्ठाय गोवर्धनधरणे भारः? ॥२८॥

उग्रः शिवः । शिवधनुर्भङ्ग इति पठितैकपाठता ॥२९॥

पदारविन्दैकपरागतः पुरा
शिलामपि श्रीसदृशीं भवान्व्यधात् ।
करेण कुब्जां चिबुके यदा पदे
स्पृशन्व्यधत्तेश तथेति कः स्मयः ॥३१॥

निहत्य निश्शेषमशेषराजकं
मही द्विजेभ्यो मखदक्षिणीकृता ।
करग्रहार्हा न ममेति किं विभो
तमुग्रसेनं धरणीपतिं व्यधाः ॥३२॥

पयोनिधिर्देव भवान्तरद्वये
भवत्प्रतापज्वलनानुभाववित् ।
अदत्त वीतानुशयं प्रसादयन्
पदं तव द्वारवतीपदास्पदम् ॥३३॥

पुरा व्यरौत्सं पुरुहूतजं मुधा
सुहृत्त्वमुष्णांशुसुतेन शीलयन् ।
इतीव जातानुशयो ध्रुवं भवान्
इहावतारे कृतवान् विपर्ययम् ॥३४॥

रसोत्तरङ्गां त्वयि रागसंपदं
विधाय वंशीमधरे बिभ्रति ।
मनोभवो बल्लवपल्लवाधरा-
मनस्स्वतानीदनुरागसम्पदम् ॥३५॥

---

भवान्तरद्वये परशुराम-रामावतारकाल ॥३३॥

रामावतारे इन्द्रसूनुर्वाली शत्रुः सूर्यसुतः सुग्रीवः सुहृत् । कृष्णावतारकाले इन्द्रसूनुरर्जुनः सुहृत्, सूयसुतः कर्णः शत्रुः ॥३४॥



रसोत्तरं धन्व रणन्मधुव्रतं शरं सृणिं पाशमपीश बिभ्रतम् ।
करद्वयीकल्पितवेणुकं च यो भवन्तमन्तर्भजते स भाग्यभाक् ॥

### चिदम्बरादिक्षेत्रगमनम्

इति स्तुवन्नेत्य यतिश्चिदंबरं स नीलकण्ठं सदसि व्यलोकयत् ।
अवेक्ष्य यः स्वापजुषं हरिं घनं सलोकपालश्चतुरं प्रणृत्यति ॥

गलत्करोदञ्चितकङ्कणोल्बणं
निरीक्ष्य यं नृत्यति कालिका स्वयम् ।
तमद्भुतं वीक्ष्य स नीलकन्धरं
ततस्तपस्वी गरुडापगामगात् ॥३८॥

फणाभृतं पावयितुं स्वरालया-
दुपैति यत्रोपतटं सुरापगा ।
निमज्ज्य तस्यां निखिलागमाकरं
स कोट्टलंपाक्कमटीकताकरम् ॥३९॥

पवित्रयन्नत्र स भैक्षचर्यया स्वयं भवस्वामिसुधीनिकेतनम् ।
पिनाकिनीं प्राप धुनीं विवर्तते पिनाकिनी यत्र निमज्जतां तनुः ॥

---

श्रीविद्याराजगोपाल इति मन्त्रशास्त्रे ललिताया श्रीकृष्णस्य चैकरूपतया ध्यानाय षट्करा देवता प्रसिद्धा, रसोत्तरं इक्षुधनुः, रणन्मधुव्रतं पौष्पं शरं पाशमंकुशं चेति ललितासाधारणैश्चतुर्भिर्भुजैः वेणुं कृष्णसाधारणाभ्यां भुजाभ्यां च दधती ॥३६॥

भवस्वामिसुधीनिकेतनम् - भवस्वामी नाम भाष्यकर्ता, यस्मात् षष्ठोऽयं राजचूडामणिदीक्षितः कविः ॥ पूर्वजमहिम्नि महत्या श्रद्धया अस्थानपतितेनादरेण च, शङ्करभगवत्पादानां अस्य गृहे भिक्षाग्रहणं वर्णयति कविः । वस्तुतः भगवत्पादेभ्योऽर्वाचीनोऽयं भवस्वामी । अथवा, बहवस्तद्वंश्याः भवस्वामिनामानः । भवस्वामिनः पौत्रः

अरुणाचलक्षेत्रगमनम् ।

विधाय तस्यां विधिवन्निमज्जनं
शुचिर्ययौ शोणगिरीशितुः पुरीम् ।
महानलस्तंभवपुर्महेश्वरो
व्युदास यस्यां विधुवेधसोर्मृगम् ॥४१॥

अगेन्द्रजा यत्र किलातिकोमलं कलेवरार्धं ददती कपालिने ।
तदीयमर्धं पुरुषं ततोऽग्रहीन्न जडात्मजन्मा किमु वेत्ति सांप्रतम् ॥

पितृप्रसूं वन्दितुमुद्यतो रुषा पृथग्भवद्वामकरो यदञ्जलिः ।
क्षणेन भूषाहिफणेन पूर्यते तमर्धनारीश्वरमभ्यवन्दत ॥४३॥

निरीक्षमाणः पथि सत्यमङ्गलं निवासयोग्यं मणिखेटयज्वनः ।
पयोनदीं प्राप पयो यदंभसा विमिश्रितं वेत्तुमलं न सारसाः ॥

---

कुमारभवस्वामी, तत्पौत्रो भवस्वामिभट्टः । कदाचित् एतेषां पूर्वतनः कश्चन भवस्वामी शङ्करसमकालिकः अवर्ततेति धिया कविना एवं वर्णितं स्यादित्यूह्यते । पिनाकिनो शिवाकारा तनुः विवर्तते ॥४०॥

स कपाली, तस्मै अतिकोमलं स्ववपुरर्धं ददौ । तदीयं अर्धमगृह्णात् । जडात्मजो हिमवतो जाता किल? सांप्रतं युक्तायुक्तं वेत्ति किमु ? ॥४२॥

शिवेन पितृप्रसूं सायंसन्ध्यां वन्दितुं अञ्जलिः उद्यतः । पार्वती न तां वन्दितुमुदसहत । रुषा स्वीयं वामकरं पृथगकरोत् । भूषाहिफणः वामकरस्थानीभवन् अञ्जलिं पूर्णमातनोत् । सायंसन्ध्या पितृप्रसूरिति कोशः ॥४३॥

मणिखेटयज्वनः रत्नखेटश्रीनिवासदीक्षिताख्यस्य कवेः पितुः जनिष्यमाणस्य निवासाय योग्यम् ॥४४॥



सत्यव्रतक्षेत्रगमनम् ।

इहावगाह्य प्रयतो यतिः शनैरियाय सत्यव्रतमिन्दिरास्पदम् ।
रमाधरास्वादरतोऽपि माधवो वपारसं यत्र स बह्वमन्यत ॥

सरस्यथामज्ज्य समाचरन्क्रियाः निरस्य मोहं निबिडं तपोनिधिः ।
स पुण्यकोटीनिलयं समाश्रयन् स पुण्यकोटीनिलयं स्वयप्यवैत् ॥

अवन्दतानिन्दितभक्तिरिन्दिरां ततो महादेव्यभिधां तपोधनः ।
हरिः स्ववक्षःस्थयदीक्षणान्नृणां अभीष्टसिद्धौ वरदत्वमश्नुते ॥

चतुर्भुजस्तंभचमत्कृते हरेरनर्घवक्षोहरिनीलमण्डपे ।
स्मरागमं कौस्तुभरत्नपीठिकास्थिरासिका व्याकुरुते सदैव या ॥

विधाय डोलां वनमालिकां विभोर्भुजान्तरे पुंखितसूरिकंपिताम् ।
तदीयगन्धोत्तरलालिझंक्रियाविलासगीतीर्विहृतिं तनोति या ॥

काञ्चीगमनम्

स मस्करी काञ्चिपुरीं गरीयसी-
मथ क्षितेरद्भुतकाञ्चिमैक्षत ।
असावशेषश्रुतिनीविरादरात्
पुरारिराराधयते चिराय याम् ॥५०॥

त्रयी यदद्वैतरसालवल्लिका-
ऽप्यनेकशाखोपचितात्मके उभे ।

---

सत्यव्रतक्षेत्रं यत्र वरदराजो विराजते । लघीयसी काञ्ची इति व्यवहारे ॥४५॥

तयोरियत्येव भिदा यदादिमा
स्फुरत्फला मूर्ध्नि परा तु मूलतः ॥५१॥

कुतूहलेनाथ कुलाद्रिकन्यका-
कुचाग्रसीमैणमदेन मुद्रितम् ।
महोनिधिं तत्र महाहिसङ्गतं
विलोकयन्नित्थमसौ व्यजिज्ञपत् ॥५२॥

रसालमूले रचितासिकं तदा
गवेषमाणा गहनागमाञ्चले ।
विभो लभन्ते यदमी विपश्चितो
भवन्तमेषा तव वैभवोन्नतिः ॥५३॥

विमुञ्च चान्द्रया कलया वियन्नदीं
विधेहि कम्पाधुनिमेव मूर्धनि ।
चिरेण ताभ्यामनपाहृतं च यत्
तवाङ्गजं तापमपाजहार सा ॥ ५४ ॥

गिरीश मारग्लपिताशये यदा
कृतानुकम्पा समजायत त्वयि ।
तदादि कम्पेति नदीयमीर्यते
न भीमसेनः किमु भीमनामकः ॥५५॥

---

त्रयी एकाम्रवृक्षं इति एतयोर्मध्ये त्रयी मूर्ध्नि उपनिषत्सु श्रुति-शीर्षभूतासु स्फुरत्फला, एकाम्रवृक्षस्याधः मूले तत्फलं राजते इति विशेषः ॥५१॥

गंगाधरो माभूः, कम्पाधरो भूयाः ।।५४॥



अगेन्द्रजाऽकम्पत कम्पया पुनः
प्रभो भवानप्यलमभ्यकम्पत ।
अथापि सा भीरुरितीर्यते, भवान्
पुनर्न, पुण्येन हि लभ्यते यशः ॥५६॥

भवन्तमेके पुरुषं पुरातनं
परे त्रिलोकीतिलकं बभाषिरे ।
कुलाद्रिकन्याकुचकुम्भसङ्गते
बिभर्षि भूम्ना पुलकाङ्कुरं कथम् ॥५७॥

सुरस्रवन्तीं सतताद‍ृतां स्वभू-
शिरःस्रगङ्कूरमुशन्ति केचन ।
शशाङ्करेखामहमीश पाण्डुभू-
शरासनाघातकिणं तु साधये ॥५८॥

सुधांशुरेखोभयकोटिनिस्सरत्-
सुधाकणोदञ्चितमौक्तिकावलिः ।
कुलाचलाधीशकुमारिकाकर-
ग्रहोत्सवे ते शुभिकाऽभवत्किमु ॥५९॥

---

कामाक्ष्यपि अनुकंपया अकम्पत, भवानपि तथा। परं सा भीरुः, भवान्परं न तथेति किमिदम् ? ॥५६॥

तव शिरसि काचन रेखा। केचिदेनां गंगामाहुः, केचित् ब्रह्म-शिरःकपालमिति, अन्ये चन्द्ररेखां, नैतत्साधु। अर्जुनधनुःप्रहारजः किण इति तु सत्यं इत्यहं साधये ॥५८॥

शुभिका शुभाक्षतादिप्रक्षेपः ॥५९॥

धनञ्जयोदग्रधनुर्लताहतिप्ररूढगाढव्रणशान्तये प्रभौ ।
शिरस्यहो शुभ्रदुकूलपट्टिका सुरस्रवन्ती भवतोऽभवत्किमु ॥६०

श्रीकामाक्ष्यालयप्रवेशः

इति स्तुवन्निन्दुकलावतंसकं ... ... ...।।[1]
पुरन्दरप्रष्ठदिगीश्वरावलीपुरन्ध्रिकालंक्रियमाणमण्डपम् ॥६१॥

निरन्तरोपान्तसुवर्णगोपुरं चिरत्नचिन्तामणिजालनिर्मितम् ।
... ... ... ... ... ... ॥ ॥६२॥

कुरङ्गनाभिद्रवकुङ्कुमच्छटापटीरकर्पूरसुवासिताङ्गणम् ।
मणीमयादर्शमनोज्ञझल्लिकाकनद्वितानोज्ज्वलकायमानकम् ॥६३

सर्वज्ञपीठारोहणम्

तत्र क्वचिद्रुचिरतप्तसुवर्णपीठे
बौद्धार्हतादिबहुबाह्यमताध्वनीनान् ।
पश्यत्पदप्रमुखसूत्रकृतश्च विद्या-
भद्रासनान्तिकगतानयमालुलोके ॥६४॥

तत्र स्थितान्निगमशेखरदेशिकेन्द्रो
वादे विजित्य विविधानपि वावदूकान् ।



पाणौ सनन्दनमसाववलम्ब्य विद्या-
भद्रासनं तदधिरोहितमुच्चचाल ॥६५॥

शृङ्गाररसान्द्रकवितासरणावजित्वा
मामङ्ग साहसमिदं सहसा न कुर्याः ।
इत्यूचिषीं विधिवधूं च विजित्य विद्या-
भद्रासनं विधिरिव स्वयमध्यरुक्षत् ॥६६॥

तथागतकथा मुधाऽजनि तथैव तौतातिकं
मतं विधुतमाकुलाकुलमभूत्कुलं विद्विषाम् ।
क्षणेन नयवद्विदा हृतमदाः कणादादयः
समुल्लसति भंगुरेतरवचोंकुरे शङ्करे ॥६७॥

ततो दिविषदध्वनि ध्वनिनिवारिताशावली-
धुरन्धरसमीरितत्रिदशपाणिकोणाहतः ।
अरुन्ध हरिदन्तरं स्वरभरैर्भ्रमत्सिन्धुभिः
घनाघनघनस्वनप्रथमबन्धुभिर्दुन्दुभिः ॥६८॥

कचभरनहनं पुलोमजायाः
कतिचिदहान्यपगर्भकं यथा स्यात् ।
गुरुशिरसि तथा सुधाशनाः स्व-
स्तरुकुसुमान्यथ हर्षतोऽभ्यवर्षन् ॥६९॥

---

कामाक्ष्यालयप्रवेशं ऊह्यते त्रुटितानन्तरवर्तिना भागेन ॥६१॥

पश्यत्पदः अक्षपादः ॥६४॥

कामतन्त्रविषयकभारतीविजयः विश्वरूपानन्तरं उभयभारत्या विजयरूपेण विश्वरूपजयानन्तरं निबद्धो माधवीयादिषु । जगद्गुरु-रत्नमालायां अत्र ।

पुलोमजाया इन्द्रपत्न्याः केशालङ्कारणाय कञ्चन कालं पुष्पाणि नालभ्यन्त, सन्नेषां स्वस्तरुकुसुमानां गुरुशिरसि प्रक्षिप्तत्वात् ॥६९॥

---

1 इतः परं बहुषु स्थलेषु पादस्य अर्धस्य च त्रुटिः उपलभ्यते. बहु प्रयतमानेनापि अस्मादृशा असंपूर्णा ।

अद्वैतसिद्धान्तरहस्यमित्थं आचन्द्रतारार्कमनाकुलं सः ।
कृत्वा विकुर्वाणमनाः प्रणम्य तुष्टाव देवीं निगमान्तनीवीम् ॥

कामाक्षीस्तुतिः

करुणारससारसुधावरुणालयविहरमाणदृक्कोणम् ।
अरुणाधरमवलंबे तरुणारुणकान्ति किमपि तारुण्यम् ॥७१॥

एणीदृशमैशानीं शोणीकृतदशदिशं शरीररुचा ।
वाणीमधुरिपुरमणीवेणीकुसुमांघ्रिनखरुचिं वन्दे ॥७२॥

ईडामहे महेशीं चूडाविन्यासभूषितसुधांशुम् ।
व्रीडानुरागशबलक्रीडावीक्षावशंवदमहेशाम् ॥७३॥

लवलीलतामतल्लीनवलीलागन्धिललिततनुयष्टौ ।
भव लीलाभृति च मनो लवलीढजपारुणिम्नि तरुणिम्नि ॥

ह्रींकारपञ्जरशुकीमोङ्कारोद्यानकेलिकलकण्ठीम् ।
शृंगारराजहाहाहंकारनिदानमाश्रये देवीम् ॥७५॥

(हरणोद्यत)कुसुमायुधशरहृतधैर्यं कटाक्षमात्रेण ।
स्मरहरमपि संविदधत्स्फुरिताधरमस्तु वस्तु पुरः ॥७६॥

समयामीडे महतीं समया संवर्तमुल्लसन्तीं ताम् ।
समयानपेक्षमुत्पलसमया श्रेयो दृशैव वितरन्तीम् ॥७७॥

कनककनत्तनुवल्लीजनकसमच्छायतुंगवक्षोजा ।
सनकसनन्दध्येया घनकबरी भातु शैलराजसुता ॥७८॥

---

विकुर्वाणमनाः विश्रान्तचेता हृष्टः ॥७०॥

समया संवर्त इति स्वाधिष्ठानचक्राधिपती शिवदंपती ॥७७॥



हरितमुखकठिनमस्तकशूलहरस्तनभरं जपाशोणम् ।
अस्ति कुलदैवतं नः स्वस्ति परेभ्यः सुधाशेभ्यः ॥७९॥

लवतामघं नयन्ती नवतामरसश्रिया दृशा भजताम् ।
भववामतनुर्मम सा भवतापविमुक्तये भवतात् ॥८०॥

ह्रीमिति जपतां ददती सामितिरोभूतपौरुषं रूपम् ।
सा मितिविरहितमहिमा कामितसिद्धिं करोतु कामाक्षी ॥८१॥

संकुचदम्बुजसमकुचमंकुशपाशेक्षुचापपरिमिलितम् ।
कुंकुमसमरुचि दैवतमंकुरितं मम कुतूहलं कुरुताम् ॥८२॥

कलया पुषितचकोरीकुलया कोरकितहेमकोटीरम् ।
निलयायितमुनिहृदयं कलयामः किमपि कटाक्षितारुण्यम् ॥

ललना शंभोस्त्रिजगत्कलनापालनतिरोधिकृतलीला ।
वलनानि दृशोरनिशं तुलनादूराणि मयि भृशं तनुताम् ॥८४॥

ह्रींलेखार्थमबाधितमुल्लेखातीतसहजसौन्दर्यम् ।
तल्लेखावनतं शशभृल्लेखालाञ्छितं महो महये ॥८५॥

इत्थं पञ्चदशाक्षरीमनुगतैर्वर्णैः कृतोपक्रमैः
कामाक्षीं बहिराहितस्थितिमतीं पद्यैः समाराधयत् ।

---

नः अस्माकं कुलदैवतं जपाशोणं दैवतमस्ति । सन्त्वन्ये देवताः सुधाशनेन तृप्यन्तः । न तैः किमपि कृत्यं नः । परेभ्यः तेभ्यः सुधाशेभ्यः स्वस्त्यस्तु ॥७९॥

पुषितं पुष्टं कृतपोषं चकोरीकुलं यया चान्द्रचा कलया ॥८३॥

लेखैः सुरैरवनतम् ॥८५॥

कंपातीरनिवासिनीं परचितं नन्तुं बिलाभ्यन्तरं
गच्छन् द्वारि कृतासिकां भगवतीं तुष्टाव स श्यामलाम् ॥

श्यामलास्तुतिः

ऐन्दव्या कलयाऽभिनन्द्यमकुटामैशीं कलामाश्रये
नीपानोकहमञ्जरीमधुझरीमीरन्ध्रसिक्तांगकाम् ।
विन्यस्य स्तनमण्डले मणिमयीं वीणां मनोहारिणीं
श्रुत्यन्तानभिजातगीति(निवहं प्री)त्यालपन्तीं मुहुः ॥

ह्रींमुद्रापहाय वेगशिथिलह्रीबेरजातिस्रजं
(व्याधूयाप्यवतं)सकान्परिगलत्काञ्च्या भजन्तीं स्वयम् ।
तामम्बामवलंबतां मम मनस्तादृक्कदंबाटवी-
मध्ये दिव्यमणीगृहे शिवमये मञ्चे समासेदुषीम् ॥८८॥

श्रीमत्यंब कदंबकाननचरि क्षेमङ्करि प्राणिनां
देवि त्वं मयि दीनतैकवसतौ दृष्टिं निधेहि क्षणम् ।
कारुण्यामृतसिन्धुबन्धुविलुठत्कल्लोलपारंपरी-
संभेदाप्लवकेलिकागुणनिकासञ्जातकौतूहले ॥८९॥

ऐन्द्रं भूतल एव भो वितरतादैश्वर्यमुच्चैः शिवा
कालोन्मीलितनीलनीरजवनीकान्तिच्छटाकोविदा ।
सद्यःफुल्लजपाविपाटलतमां शाटीं समाबिभ्रती
कीरं कञ्चन पाठयन्त्यनुदिनं कीर्तिं पुरद्रोहिणः ॥९०॥

क्लींमित्यक्षरमेकदापि गदति क्रीडावशेनापि यः
तस्य त्वं रसनाञ्चले कमलभूतन्वीं विधत्से शिवे ।

---

त्रितारिकाबालात्र्यक्षरीमन्त्राक्षरोपक्रमैः श्लोकैः षड्भिः श्यामलां स्तौति ॥८७॥



पाथोराशिसुतामपाङ्गवलने पार्श्वे शतं योषितां
पादाग्रे पृथिवीभुजोऽपि सकलान्पर्यायसेवावहान् ॥९१॥

सौरभ्यस्फुरमाणबाणजयदे सौन्दर्यसंपन्निधे
सौभाग्यैकनिवासभूमिपरतासौलभ्यभूमावधे ।
वश्याशेषचराचरे कुचजितावश्यायभूमीधरे
पश्यालीक(......)यावश्यामले श्यामले ॥९२॥

इत्थं तामभिवन्द्य विश्वजननीमीशामथान्तर्विशन्
कल्पानोकहकाननालिसुभगे कंपानदीरोधसि ।
कामाक्षीपदपद्मभूतशिखरं कञ्चित्पुरः कांचन-
क्षोणीभृत्कुलधूर्वहं प्रमुमुदे पश्यन्सपद्यञ्जसा ॥९३॥

इति दन्तिद्योतिदिवाप्रदोपाङ्क-अद्वैतविद्याचार्य-सर्वतन्त्रस्वतन्त्र-
लक्ष्मीभवस्वामिभट्टसुकृतपरिपाक-विश्वामित्रवंशमुक्ताफल-सत्य-
मङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य
श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य
श्रीराजचूडामणिदीक्षितस्य कृतिषु
शङ्कराभ्युदये काव्ये सप्तमः सर्गः ।

# अष्टमः सर्गः

इष्टामथ स योगीन्द्रश्चाष्टापदगिरिस्थिताम् ।
तुष्टाशयः सावरणां तुष्टाव परदेवताम् ॥१॥

मेघङ्करमणिच्छायामेचकीकृतसत्पथः ।
मेरुरातनुताद्दूरे मेदुरा मे दुरापदः ॥२॥

कूटत्रितयवास्तव्यकूटस्थपुरुषत्रयम् ।
कुरुतां मध्यमं शृङ्गं कुशलान्यस्य भूभृतः ॥३॥

काञ्चनक्षीररनीपाम्रकाञ्चनारद्रुमामिह ।
काञ्चन श्रीपुराभिख्यां कामाक्ष्याः कलये पुरीम् ॥४॥

उच्चैरायससालाढ्यं उच्चावचतरूच्चयम् ।
उद्यानमस्य विद्यानां उद्योतयतु मर्म मे ॥५॥

कपिशाभं महाकालं कापिशायनलालसम् ।
कलयेऽत्र महाकालीकण्ठाश्लेषसकौतुकम् ॥६॥

---

अष्टापदं स्वर्णं, अष्टापदगिरिर्मेरुः ॥१॥

मेघङ्कर इन्द्रः । सत्पथं आकाशः ॥२॥

कूटत्रितयम् – प्राच्यां नैर्ऋत्यां वायव्यां च दिशि कूटत्रयं मेरोः । प्राक्कूटे ब्रह्मपुरं, नैर्ऋतकूटे विष्णुपुरं, वायव्यकूटे रुद्रपुरं, कूटत्रयमध्ये मध्यमं शृङ्गं श्रीपुरस्थानम् ॥३॥

श्रीपुरं यत्र वृक्षाः काञ्चनमेव क्षीरतया स्रवन्ति ॥४॥

अस्य पुरस्य सालाः प्राकाराः पञ्चविंशतिः । प्रथमः सालः आयसः अयोमयः । तदन्तः विद्योद्यानम् ॥५॥

अत्र कापिशायनं मद्यं, तल्लालसो महाकालः महाकाल्या सह वर्तते ॥६॥



दीव्यद्बिन्दुत्रिपञ्चारद्विरष्टाष्टदलाम्बुजम् ।
दिश्यान्मे कालचक्राख्यं दीर्घमायुस्तदासनम् ॥७॥

वरायसाऽभितः कांस्यवलयेन परिष्कृता ।
वरदास्तु वनद्भृङ्गवलया कल्पवाटिका ॥८॥

मधुमाधवलक्ष्मीभ्यां मानिनीभ्यामिहोल्लसन् ।
मारैकमन्त्री मे भूयान्मासः पुष्पाकरो मुदे ॥९॥

ताम्राकारेण सालेन तादृशीं प्रापितः श्रियम् ॥
तन्वीत सन्तनाक्रीडस्तन्वीं सन्तापसन्ततिम् ॥१०॥

शुचिस्मिताभ्यां शुक्रश्रीशुचिश्रीभ्यामिहोज्ज्वलन् ।
शुभानि मे निदाघर्तुः शुचमुन्मूलयन् क्रियात् ॥११॥

हारसीसापरिवृता हरिचन्दनवाटिका ।
हठादथ निदाघोत्थकोलाहलमपाक्रियात् ॥१२॥

लक्ष्यो नाभसनाभस्यलक्ष्मीभ्यामिह सन्ततम् ।
लसयेन्मम साहित्यलालितीं जलदागमः ॥१३॥

---

महाकालः कालचक्राख्यं आसनं अलंकरोति । तत् बिन्दु-त्रिकोण-पञ्चकोण-षोडशदलाष्टदलयुतम् ॥७॥

ततो वरायसा तीक्ष्णलोहेन, अभितः कांस्यवलयेन प्राकारेण परिवृता । तदन्तः कल्पवृक्षोद्यानम् ॥८॥

तत्र वसन्तर्तुः मधुश्रीमाधवश्रीशक्तिसहितः वर्तते ॥९॥

ततः ताम्रमयस्तृतीयः सालः यस्यान्तः सन्तानवृक्षोद्यानम् सन्तान एव सन्तनः ॥१०॥

महारकूटप्राकारमहनीयोपकण्ठभूः ।
मनोरथं पूरयतान्मम मन्दारवाटिका ॥१४॥

इन्धानमिह साकूतमिषोर्जश्रीकटाक्षितम् ।
ईशानपुरसेनान्यमीडे शरदृतुं सदा ॥१५॥

प्रथीयसा पञ्चलोहप्राकारेण परिष्कृतः ।
पारिजातद्रुमारामः पातकानि व्यपोहतु ॥१६॥

सहस्सहस्यलक्ष्मीभ्यां सरसं संलपन्निह ।
स नो दिशतु सौभाग्यं समयो हिमिकामयः ॥१७।

कदम्बवाटिकापुष्पकदम्बास्थानमण्डपः ।
करोतु कलधौतेन कल्पितावरणो मुदम् ॥१८॥

तत्रासीनं तपोलक्ष्मीतपस्यश्रीतपःफलम् ।
तमन्तिकमृतुं चित्ते तनवै घनवैभवम् ॥१९॥

---

ग्रीष्मर्तुः शुक्रश्रीशुचिश्रीशक्तिसहितः तत्र वर्तते ॥

हारसीसः वंगः। तन्मयः प्राकारः चतुर्थः। तदन्तः हरिचन्दनोद्यानम्। यत्र वर्षर्तुः नभःश्रीनभस्यश्रीशक्तियुतः वर्तते ॥१३॥

आरं पित्तलं, तन्मयः कूटः पञ्चमः। तदन्तर्मन्दारवाटिका। इषाश्री-ऊर्जाश्रीशक्तिसहितः शरदृतुः यत्र वर्तते ॥१५॥

ततः पञ्चलोहप्राकारः षष्ठः - पारिजातवाटिकायुतः। यत्र सहश्रीसहस्य-श्रीशक्तियुतः हेमन्तर्तुः वर्तते ॥१७॥

कलधौतं रजतं; तन्मयः प्राकारः सप्तमः; यदन्त. कदम्बवाटिका, तपःश्रीतपस्यश्रीयुतः शिशिरर्तुः वर्तते ॥१९॥



क्लृप्तमब्जभुवा तस्यां लुप्तमोहं मणीगृहम् ।
तप्तचामीकरप्रायसप्तसालमुपास्महे ॥२०॥

भूरेखयास्मिन्वेदाशाभूपदिग्गजपङ्कजैः ।
भूत्यै पञ्चत्रिकोणाभ्यां भूषितं चक्रमस्तु नः ॥२१॥

तत्र तारुण्यसर्वस्वतरङ्गिततनूलताम् ।
तापिञ्छकुसुमच्छायां तरुणेन्दुवतंसिनीम् ॥२२॥

ताटङ्किनीं सुधाफेनताराशोभेन कम्बुना ।
तन्त्रीनादरसास्वादतत्परां नौमि चित्कलाम् ॥२३॥

स्फुरत्सुवर्णप्राकारं भूषितं सिद्धसंसदा ।
पूजयामः पुष्परागभूरुहप्रमदावनम् ॥२४॥

पुष्यरागमणीसालपुंखितानन्दचारणा ।
पुण्या सरोजरागद्रुपुष्पवाटी पुनातु माम् ॥२५॥

पायाद्गोमेदकमयैः पादपैः परिशोभितम् ।
पद्मरागमणीसालपरीतं प्रमदावनम् ॥२६॥

सहिता भैरवैः कालसंकर्षणियुतादिकैः ।
साधयेदीहितं तत्र संवृता योगिनीशतैः ॥२७॥

---

तदन्तः स्वर्णसालः अष्टमः, यत्र ब्रह्मनिर्मितं चिन्तामणिगृहम् ॥

भूपुर-चतुष्कोण-दशकोण-दशकोण-अष्टदल- पञ्चदकोण - त्रिकोणयुतं मन्त्रिणीचक्रमस्ति। यत्र श्यामला मन्त्रिणो आस्ते ॥२३॥

तदन्तः पुष्परागवृक्षोद्यानं, सिद्धैः युतं, तदन्तः नवमः पुष्परागसालः, तदन्तः पद्मरागवृक्षोद्यानं, तदन्तः पद्मरागमणिसालो दशमः, यत्र कालसङ्कर्षणिकादिभैरवीयुता योगिन्यः भैरवाश्च देवीं आराधयन्ति ॥

चारुगोमेदकमणीचमत्कृतनिजाकृतिः ।
चकास्तु लीलारण्यानी चञ्चलद्वज्रभा हृदि ॥२८॥

वज्राभिधायिनीमत्र वाहिनीमधितस्तुषीम् ।
वन्देय वल्गु गन्धर्वैर्वज्रेशीमुपवीणिताम् ॥२९॥

वृत्तहीरमणीसाला प्रावृषेण्यमणिद्रुमा ।
वरपन्नगदैतेयपालिता पुष्पवाटिका ॥३०॥

मध्येवैडूर्यवरणं महानीलाश्मवेदिकाम् ।
मान्यामुपासनासिद्धैर्मनवै मानिनीसखैः ॥३१॥

मुग्धेन्द्रनीलप्राकारा मुक्ताकारोपवाटिका ।
मुदे भवतु सुत्राममुखदेवोपलालिता ॥३२॥

रत्नगारुत्मताकारराजतालद्रुमवाटिका ।
राजन्मुक्तामणीसाला रञ्जयत्वञ्जसैव माम् ॥३३॥

कुटिलेन्दुसमच्छायक्रूरदंष्ट्राङ्कुरद्वयीम् ।
कुञ्चितभ्रूसमाज्ञप्तकुलिशास्त्रमुखामराम् ॥३४॥

---

तदन्तर्गोमेदकवृक्षोद्यानपरिवृतो गोमेदकमणिसाल एकादशः, तदन्तर्वज्रमयोद्यानं, वज्राभिधा नदी, तत्तीरे वज्रेश्वरी गन्धर्वसेविता देवीमाराधयति ॥२९॥

तदन्तर्वज्रमणिसालः, तदन्तर्वैडूर्यमणिमयोद्यानं, यत्र पन्नगा दैतेयाश्च देवीमाराधयन्ति ॥३०॥

तदन्तर्वैडूर्यमणिसालस्त्रयोदशः, तदन्तर्नीलमणिमयोद्यानं, यत्र मानिनीसखाः मनुमान्धात्रादयः देवीं पूजयन्ति । तदन्तः नीलमणिसालश्चतुर्दशः, तदन्तः मुक्तावाटी, यत्र दिक्पाला देवीमाराधयन्ति ॥



वराभये च खेटासी वल्गुं च मुसलं हलमु ।
वहन्तीं शङ्खचक्रे च वाराहीं पाटलाम्बराम् ॥३५॥

अश्वाननाह्वयां तत्र पालितोन्मत्तभैरवाम् ।
पाकारिमणिसच्छायां भावये दण्डनायिकाम् ॥३६॥

पद्मरागमणीसाला प्रवालद्रुपरिष्कृता ।
पद्मासननाथा नः पातु प्रसववाटिका ॥३७॥

पालितं पद्मनाभेन पाञ्चजन्यादिलक्ष्मणा ।
प्रवालक्लृप्तप्राकारं भावये रत्नमण्डपम् ॥३८॥

सभा माणिक्यसालाढ्या सहस्रस्तम्भमण्डिता ।
षट्त्रिंशत्तत्वनाथेन सनाथा शंभुनाऽवतात् ॥३९॥

नवरत्नोल्लसत्सालां नमाम्यमृतवाटिकाम् ।
नावा ताराऽम्बिका नित्यं नव्यया यत्र खेलति ॥४०॥

आश्रयामो मनस्सालामानन्दमयवापिकाम् ।
अस्यामनर्घां तरणीमारूढां वारुणीमपि ॥४१॥

---

तदन्तर्मुक्तामणिसालः पञ्चदशः, तदन्तर्मरकतवाटिका, यत्र वाराही दण्डनाथा आस्ते ॥३६॥

पद्मरागमणिर्मरकतं, तन्मयः षोडशः, तदन्तः प्रवालवाटिका, यत्र ब्रह्मा स्थितः, तदन्तः प्रवालप्राकारः सप्तदशः, तदन्तर्नवरत्नमण्टपं, यत्र विष्णुः स्थितः, ततो माणिक्यसालोऽष्टादशः, तदन्तः सहस्रस्तंभमण्डिता सभा, यत्र षट्त्रिंशत्तत्वनाथः शिव आस्ते ॥३९॥

ततो नवरत्नप्राकार एकोनविंशः, तदन्तः अमृतवापी, यत्र तारादेवी नौकया खेलति । तदन्तर्मनोमयः प्राकारः विंशः, तदन्तः आनन्दवापी, यत्र नौकाधिरूढा वारुणी खेलति ॥४१॥

विमर्शवापिकां ध्याये बिन्दुद्व्यावरणावृतिम् ।
विहरन्त्या मणिकया तरण्या कुरुकुल्यया ॥४२॥

आतपोद्गारिणीं कक्ष्यां अहंकारकृतावृतिम् ।
अधितिष्ठन्नजस्रं मां अव्यादानन्दभैरवः ॥४३॥

चन्द्रिकोद्गारिणीं कक्ष्यां चारुभानुमयावृतिम् ।
चमत्करोतु श्रेयांसि चन्द्रो नित्यं समाश्रयन् ॥४४॥

शिशिरांशुमहासालां शृङ्गाररसवापिकाम् ।
श्रितः शृङ्गारराजोऽसौ श्रियमङ्कुरितां क्रियात् ॥४५॥

मञ्जु (मध्ये) शृङ्गारशालस्य महापद्माटवीमणेः ।
महीयमानः प्राग्भागे मङ्गलायास्तु पावकः ॥४६॥

तत्र पात्रात्मके भानौ तरङ्गितसुधारसे ।
तरीविहारिणीश्चान्द्रीः स्तवानि सकलाः कलाः ॥४७॥

भजे तत्रैव खेलन्तीः पञ्चब्रह्मात्मिकाः कलाः ।
प्रागादिषु दिशास्वर्घ्यभाजनं च प्रतिष्ठितम् ॥४८॥

---

तदन्तः बुद्धिसालः एकविंशः, तदन्तर्विमर्शवापी, मणिकया माणिक्यमयया तरण्या कुरुकुल्या खेलति । ततोऽहङ्कारसालः द्वाविंशः, तदावृता आतपोद्गारिणी कक्ष्या आनन्दभैरवाधिष्ठिता । ततः सूर्यसालः त्रयोविंशः, तदन्तः चन्द्रिकोद्गारिणी कक्ष्या चन्द्राधिष्ठिता ॥४४॥

तदन्तः चन्द्रशालः चतुर्विंशः, तदन्तः शृङ्गारवापिका मन्मथाधिष्ठिता । तदन्तः शृङ्गारसालः पञ्चविंशः, तन्मध्ये महापद्माटवी, तस्याः प्राग्भागे देव्यर्घ्यपात्रधरः अग्निः, अर्घ्यपात्राकारः सूर्यः, तदन्तः अर्घ्यभूतः सुधारसः, तत्र विहरन्त्यः षोडश चन्द्रकलाः, ब्रह्मविष्णुरुद्रेश्वरसदाशिवाख्यपञ्चब्रह्मकलाः पञ्चाशत्, एवं प्रागादिषु चतुर्षु दिक्षु प्रतिष्ठितं अर्घ्यभाजनचतुष्कं च ॥४८॥



आश्रये सदने दिव्यं अमर्घमणिनिर्मितम् ।
तत्राग्निदिशि कुण्डस्थं हव्यवाहं च चिन्मयम् ॥४९॥

संश्रयेऽस्यान्यकोणेषु शम्बच्चक्रात्मकं रथम् ।
शताङ्गावपि वार्तालीसचिवेशान्यधिष्ठितौ ॥५०॥

त्रिजगत्पावनी तत्र त्रिपुरा रश्मिमालिका ।
तृणोतु मम पापौघतृण्यां सन्मन्त्ररूपिणी ॥५१॥

पञ्चमीश्यामलादेव्यौ भवने मणिनिर्मिते ।
प्राग्द्वारसीम्नि धाम्नोऽस्य भावये पार्श्वतः स्थिते ॥५२

चित्रद्वारं चतुष्कोणं चिरत्नवचनात्मना ।
चिन्तामणिमयं धाम चिन्तये चिन्तितार्थदम् ॥५३॥

जपाकुसुमदायादैर्जगन्मातुर्महोभरैः ।
जाज्वल्यमानेऽथैतस्मिश्चक्रं किमपि चिन्तये ॥५४॥

आदिमावरणे तस्य हसन्मुखसरोरुहाः ।
असच्चिन्तां मयूखाभाः हरन्तामणिमादयः ॥५५॥

तस्यामुपरि धिष्ण्येषु तादृशेषु कृतासिकाः ।
तन्वन्तु भद्रं ब्राह्म्याद्याः तास्ता अष्टापि मातरः ॥५६

---

महापद्माटवीमध्ये चिन्तामणिगृहं, आग्नेयकोणे चिदग्निकुण्डस्थश्चिन्मयोऽग्निः देवीप्रभवस्थानं, नैरृतकोणे देव्याः चक्रराजरथः, वायव्ये मन्त्रिण्याः गेयचक्ररथः, ऐशाने वाराह्याः किरिचक्ररथः, (वार्तालि वाराही, सचिवेशानी मन्त्रिणीश्यामला) गृहं परितः रश्मिमालाख्याः विविधा मन्त्ररूपिण्यो देवताः ॥५१॥

गृहप्राग्द्वारे पार्श्वयोः पञ्चमी वाराही, श्यामला च । चतुर्वेदमयचतुर्द्वारं गृहम् । चिरत्नवचनानि वेदाः । गृहमध्ये श्रीचक्रम् ॥५४॥

मूर्तिमत्यस्ततोऽप्युच्चैः मूल्यापेतासु वेदिषु ।
मुद्राः संकर्षिणीमुख्याः सदा सत्यं दिशन्तु नः ॥५७॥

त्रैलोक्यमोहनं चक्रं त्रिकं तदधितस्थुषी ।
त्रायतां प्रकटाख्याभिस्त्रिपुरा शक्तिरावृता ॥५८॥

कनन्त्यः शक्तयश्चोर्ध्वं कनकासनपंक्तिषु ।
कामाकर्षणिकामुख्याः कामदोग्ध्र्यो भवन्तु नः ॥५९॥

सर्वाशापूरकं चक्रं समया त्रिपुरेश्वरी ।
साक्षमाला वसति सा सन्नमद्गुप्तयोगिनी ॥६०॥

अवस्थितास्ततोऽप्युच्चैः हाटकासनपंक्तिषु ।
अर्चयामो वयं देवीरनङ्गकुसुमादिमाः ॥६१॥

सर्वसंक्षोभणे चक्रे सान्निध्यं समुपेयुषीः ।
सह त्रिपुरसुन्दर्या शक्तीर्गुप्ततराः स्तुमः ॥६२॥

अनङ्गकुसुमादीनां आसामूर्ध्वमवस्थिताः ।
भवन्तु सर्वसंक्षोभिण्यादिमाः शक्तयः सदा ॥६३॥

---

प्रथमावरणभूतं त्रैलोक्यमोहनचक्रं सीमफलकरूपभूपुरत्रयघटितम्। प्रथमं सीमफलकं अणिमादिसिद्धिभिरधिष्ठितं, द्वितीयं ब्राह्म्यादिमात्रष्टकयुतं, तृतीयं सङ्कर्षिण्यादिदशमुद्रादेवताभिरधिष्ठितम् । तत्सीमरेखात्रयं त्रैलोक्यमोहनाख्यं त्रिपुरानाम्नी शक्तिः प्रकटाख्याभिः योगिनीभिरावृता अधितिष्ठति ॥५८॥

तत ऊर्ध्वं सर्वाशापूरकं चक्रं, षोडशदलं, यत्र कामाकर्षिण्याद्याः षोडश शक्तयः, अधिष्ठात्री त्रिपुरेशी, गुप्ताख्याः योगिन्यः ॥६०॥



सर्वसौभाग्यदे चक्रे सर्वदाहितसन्निधिम् ।
संश्रये संप्रदायाभिः साकं त्रिपुरवासिनीम् ॥६४॥

वसन्तीरूर्ध्वमेतासां वलये रत्नवेदिषु ।
वरदाः सर्वसिद्ध्याद्याः वन्देमहि वयं कलाः ॥६५॥

शक्तिभिस्तु कुलोत्तीर्णासंज्ञाभिः त्रिपुराश्रियम् ।
सर्वार्थसाधके चक्रे समिन्धानामुपास्महे ॥६६॥

सर्वज्ञाद्याः कुलोत्तीर्णासदनस्योपरिस्थिताः ।
संपदं सकलाशाख्याः शक्तयः साधयन्तु नः ॥६७॥

कलयन्ती सर्वरक्षाकरचक्रान्तरे स्थितिम् ।
करोतु मे निगर्भाढ्या कामांस्त्रिपुरमालिनी ॥६८॥

सर्वज्ञासदनस्योर्ध्वं स्यन्दनेषु कृतासिकाः ।
शक्तयो वशिनीमुख्याः संसारार्तिं हरन्तु नः ॥६९॥

सार्धं चक्रे रहस्याभिः सर्वरोगहराभिधे ।
साधयेत् त्रिपुरासिद्धा सञ्चरन्ती शुभानि नः ॥७०॥

---

तत ऊर्ध्वं सर्वसंक्षोभणं चक्रं, अष्टदलं, यत्र अनङ्गकुसुमाद्याः अष्टौ शक्तयः, अधिष्ठात्री त्रिपुरसुन्दरी, गुप्ततराख्या योगिन्यः ॥६२॥

तत ऊर्ध्वं सर्वसौभाग्यदायकं चक्रं चतुर्दशारं, तत्र सर्वसंक्षोभिण्याद्याः चतुर्दश शक्तयः, त्रिपुरवासिनी अधिष्ठात्री, संप्रदायाख्या योगिन्यः ॥६४॥

तत ऊर्ध्वं सर्वार्थसाधकं चक्रं, दशारं, तत्र सर्वसिद्धिप्रदाद्याः दश कलाः, कुलोत्तीर्णाख्या योगिन्यः त्रिपुरा श्रीः तदधिष्ठात्री ॥६६॥

तत ऊर्ध्वं सर्वज्ञादिदशशक्तिभिरावृतं दशारं सर्वरक्षाकरं चक्रं यत्र निगर्भाख्ययोगिनीसेविता त्रिपुरमालिनी अधिष्ठिता ॥६८॥

ततः सर्वरोगहराभिधं चक्रं अष्टारं वशिन्याद्यष्टशक्तिवृतं, यदधितिष्ठति त्रिपुरा सिद्धा रहस्याख्ययोगिनीभिः ॥७०॥

सम्यक् क्लृप्तनिषङ्गस्थान् वन्देय शिवयोः शरान् ।
वरदाश्च ततोऽप्युच्चैर्वलये समयेश्वरीः ॥७१॥

प्रतिष्ठितां सर्वसिद्धिप्रदचक्रान्तरे सदा ।
प्रणुमोऽतिरहस्याभिः परीतां त्रिपुराम्बिकाम् ॥७२॥

उपविष्टास्ततोऽप्युच्चैर्युगनाथादिमान्गुरून् ।
ऊरीकुर्मोऽथ नित्यास्तदूर्ध्वं कामेश्वरीमुखाः ॥७३ ।

कामेश्वर्यासनादूर्ध्वं कलितावसथा मुदा ।
कल्याणानि षडङ्गानां कलयन्त्वधिदेवताः ॥७४॥

आसां षडङ्गदेवीनां आलयस्योपरिस्थितम् ।
आसनं बिन्दुरूपं तदम्बायाः समुपास्महे ॥७५॥

अंघ्रिभिर्विधृतं धातृहरिरुद्रेश्वरात्मभिः ।
अहं सदाशिवाभिख्यफलकं मञ्चमाश्रये ॥७६॥

महानीलशिलानीलमायायवनिकावृते ।
मञ्चे तत्रारुणच्छायमहनीयवितानके ॥७७॥

अनर्घपट्टोपबर्हमच्छाच्छसिचयावृतम् ।
हंसतूलाञ्चितं तल्पमाकल्पं कल्पतां मुदे ॥७८॥

तत्र मञ्चे समासीनं तरुणेन्दुशिखामणिम् ।
तापिञ्छपिञ्छसच्छायतत्ताहशकचोच्चयम् ॥७९॥

---

ततः त्रिकोणात्मकं सर्वसिद्धिप्रदं चक्रं, यत्र शिवयोरायुधानि, तदुपरि वलये कामेश्वर्याद्याः शक्तयः त्रिपुरांबा चक्रेश्वरी, अतिरहस्याख्या योगिन्यश्च ॥७३॥



मकुटेन्दुकलाशेषमोहदायिललाटकम् ।
मुखाब्जलोललोलम्बमुग्धमृगमदतिलकम् ॥८०॥

विजितानङ्गकोदण्डविभ्रमभ्रूविराजितम् ।
विशृङ्खलदयासिन्धुं पाञ्चिकाविहरद्दृशम् ॥८१॥

कनत्कनकचाम्पेयकान्तिलुण्टाकनासिकम् ।
कर्पूरवीटिकावक्त्रं कपोलालोलकुण्डलम् ॥८२॥

मन्दस्मितमहःपुञ्जं मधुराधरपल्लवम् ।
मनोज्ञकुन्दकोशश्रीमलिम्लुचरदाङ्कुरम् ॥८३॥

पाञ्चजन्यमदाटोपपरिभावुककन्धरम् ।
प्रसवास्त्रेक्षुकोदण्डपाशाङ्कुशलसत्करम् ॥८४॥

भुजान्तरालसंलोलपृथुमुक्तामणिस्तरम् ।
पुष्पास्त्रमौर्वीललितपुण्ड्ररोमलताञ्चितम् ॥८५॥

कुसुंभकुंकुमारक्त(पट्टवल्लोल्लस)त्कटिम् ।
कूलङ्कषात्मसौभाग्यकुत्सितेभकरोरुकम् ॥८६॥

जातरूपमयादर्शजडिमावहजानुकम् ।
ज...............जयकाहलवैभवम् ॥८७॥

कूटस्थकमठेन्द्रश्रीकुट्टाकप्रपदद्वयम् ।
कुतुकानतलोकेशकोटीरविलुठत्पदम् ॥८८॥

कन्दर्पकांक्षणीयोच्चैःकमनीयकशेवधिम् ।
कलयामि जपाशोणं कामेश्वरमहेश्वरम् ॥८९॥

---

तदुपरि युगनाथाद्या गुरवः, षडङ्गदेवताः, तदुपरि बिन्दुः भगवदा

तदङ्कतलपर्यङ्कां तरङ्गितदयारसाम् ।
तटिदालोकदायादतनुवल्लीमरीचिकाम् ॥९०॥

राजच्चिन्तादिरत्नौघखचितकोटीरमण्डिताम् ।
जीवञ्जीवकुलाव्याजजीवनप्रदशेखराम् ॥९१॥

लावण्यस्रुतिशङ्काहंलसन्मुक्तालसन्तिकाम् ।
ललाटफलकात्मेन्दुलक्ष्मणमदचित्रकाम् ॥९२॥

(कुंकुमच्छुरिकाशङ्का)करफालविलोचनाम् ।
करुणारसमाध्वीककराम्बितदृगञ्चलाम् ॥९३॥

निसर्गहृद्यनासाग्र(निर्य)न्निश्वासकन्दलाम् ।
बन्धुजीवजपाबिम्बबन्धुराधरपल्लवाम् ॥९४॥

पक्वदाडिमबीजाभ (दन्तपंक्तिद्वयोज्ज्वलाम् ।)
... ... ... ... ... ॥९५॥

(कर्पूरसान्द्र)ताम्बूलकपोलफलकोज्ज्वलाम् ।
कटाक्षरश्मिशोणाश्मकीर्णपत्रचमत्कृताम् ॥९६॥

कण्ठकम्बुगला(लम्बि स्वच्छमौक्तिकमालिकाम् ।)
काश्मीरागरुपाटीरकस्तूरीचित्रितस्तनीम् ॥९७॥

चबुलाभा(?)भ्रमाधान चञ्चुरोमलताञ्चिताम् ।
चूलीकृतालूर ... ... ... ... ॥९८॥

......वालिप्तचारुकौशुंभशाटिकाम् ।
वक्रशोभावहश्रोणीमञ्चत्काञ्चनकाञ्चिकाम् ॥९९॥

आसनं सर्वानन्दमयचक्रं पञ्चब्रह्मासन. मायायवनिका, अ वितानं, हंसतूलिकातल्पः, मञ्चोपरि स्थितः कामेश्वरः ॥८९।



...तञ्चशुण्डावैदग्ध्य ... ... ... ... ।
कुसुमायुधतूणीरविकल्पानल्पजंघिकाम् ॥१००॥

दूरीकृतडुलिश्रेणीदुर्मदप्रपदद्वयीम् ।
तुलारहितमाणिक्यतुलाकोटिलसत्पदाम् ॥१०१॥

... ... ... विचित्रपदक्रमाम् ।
आब्रह्मस्तम्बजननीमानन्दाद्वैतचिन्मयीम् ॥१०२॥

वेधोविधुमुखीलक्ष्मीविधूतसितचामराम् ।
... ... ... ... ... ... ॥१०३॥

पतत्पतद्ग्रहव्यग्रभानुजान्तःपुरीजनाम् ।
पादुकाधारणायत्तप्रचेतःप्रमदामयीम् ॥१०४॥

... ... ... ... वारणाम् ।
तत्तदाज्ञाकरान्याशाधवपाणिगृहीतिकाम् ॥१०५॥

रसनापुष्कलायुध्यरमणीयशिलीमुखाम् ।
पाशांकुशपरिस्फूर्जत्पाणिपल्लवतल्लजाम् ॥१०६॥

मन्दारमालासन्दोहकुङ्कुमक्षोदपाटलम् ।
कुलदैवतमन्तस्तत्कुर्महे शर्महेतवे ॥१०७॥

... ... ... ... ... ... ।
... ... ... ... ... ... ॥१०८॥

मधुरिमधुरीणचापविल(?) ... ... ।
... करे भगवति देवि प्रसीद परे विद्ये ॥१०९॥

शंपाकलापग्रहणलम्पटकान्तिपूरे
कंपानदीतटवने विहितानुकम्पा ।

... ... ... ... ...
आनन्दकन्दलतरङ्गितमन्तरङ्गम् ॥११०॥

इत्थङ्कारमभङ्गुराङ्गजमहायन्त्रावकृष्ट्यानम-
त्पा ... विनिवहोज्ज्वलाब्धिविहृतीलोलैर्गिरां गुम्फनैः ।
कम्पातीरनिवासिनीमनुदिनं कामेश्वरीमर्चयन्
ब्रह्मानन्दमविन्दत त्रिजगतां क्षेमङ्करश्शङ्करः ॥१११॥

इति दन्तिद्योतिदिवाप्रदोपाङ्क-अद्वैतविद्याचार्य-सर्वतन्त्रस्वतन्त्र-
लक्ष्मीभवस्वामिभट्टसुकृतपरिपाक-विश्वामित्रवंशमुक्ताफल सत्य-
मङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य
श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य
श्रीराजचूडामणिदीक्षितस्य कृतिषु
शङ्कराभ्युदये काव्ये अष्टमः सर्गः ।

---

तदङ्कगता कामेश्वरी ॥११०॥

कम्पातीरवासिनीं कामेश्वरीमर्चयन् त्रिजगतां क्षेमङ्करः शङ्करो ब्रह्मानन्दमविन्दत । "कामाक्ष्या निकटे जातु सन्निविश्य जगद्गुरुः । देहिभिदुर्भजं भेजे देहं तत्रैव सन्त्यजन् ॥ अखण्डज्योतिरानन्दमक्षरं परमं पदम् । स एव शङ्कराचार्यो गुरुर्मुक्तिप्रदः सताम् । अद्यापि मूर्तं चैतन्यमिव तत्रैव तिष्ठति ॥" इति संप्रदायविदामनुस्मरणम् ।

परित्यज्य मौनं वटाधःस्थितिश्च प्रयान्भारतस्य प्रदेशात्प्रदेशम् ।
मधुस्यन्दिवाचा नयन्धर्ममार्गे गुरुः शङ्करो नस्तिरूपोऽस्ति काञ्चयाम् ॥

शङ्कराभ्युदयं काव्यं चूडामणिमखीरितम् ।
अर्प्यते कामकोटीशदत्पथेऽद्य सटिप्पणम् ॥



श्रीरामभद्रयज्वनः कृतेः

## पतञ्जलिविजयात्

यथामूलं उद्धृतं

## श्रीशङ्करभगवत्पादचरितम्

गोविन्दभगवत्पादाचार्याः गार्हस्थ्ये चन्द्रशर्मनाम्ना प्रसिद्धाः (पृ-११) । तेषां चरितं वर्णयन्कविः प्रस्तौति सप्तमे सर्गे-

तनयानपाठयदयं पतञ्जलेः
महतीं कृतिं मतिमतां गणैः सह ॥१४॥

पठिते पतञ्जलिनिबन्धने द्विजः
कृतदारकर्मणि च पुत्रमण्डले ।
शुकशिष्यगौडपदगुर्वनुग्रहात्
चरमाश्रमं सुरनदीं च शिश्रिये ॥३१॥

चतुराननेन विधिनेव मुञ्चता
समधिष्ठितं जगदशेषमात्मनि ।
भजताऽमुना परमहंससेव्यतां
अथ विश्वनाथपुरमाददे श्रियम् ॥३२॥

स तु विश्वनाथपुरमावसन्यतिः
समुपेयुषां सदसती हि वस्तुनी ।
वचनेन चञ्चुकलनेन विष्टपे
विविवेच हंस इव दुग्धपाथसी ॥६४॥

उपसंहृतेन विषयानुभावनात्
परमे स एव परिनिष्ठितेन च ।
समवृत्तिना सहृदयेन पप्रथे
सुखदुःखयोः सखिसपत्नयोरपि ॥६५॥

स्वप्नप्रपञ्चसदृशं जगत्त्रयं
विदुषा मृषा मरुमरीचिवारिव ।
अमुना स्वरूपमवशेषितं धिया
परमात्मबोधसुखमात्रलक्षणम् ॥६६॥

सुरसिन्धुरोधसि गिरीशसन्निधा-
वतिनीय तत्र कियतोऽप्यनेहसः ।
विरहासहैरनुगतस्स योगिभिः
परिपावनं बदरिकाश्रमं ययौ ॥६७॥

ब्रह्माद्वैतं पश्यताऽशेषविश्वं
गोविन्दस्वामीति गीतेन लोके ।
पुण्यक्षेत्रे तत्र नारायणीये
कांश्चित्कालानाश्रमे तेन तस्थे ॥६८॥

## अष्टमे सर्गे—शङ्करभगवत्पादचरितम्

अत्रान्तरे सरिति नक्रगृहीतपादः
संन्यस्तशङ्करमुनिर्दुरिताद्विमुक्तः ।
गोविन्ददेशिकपदाम्बुजदर्शनाय
बद्धादरो बदरिकाश्रममन्वियाय ॥१७॥

शैलान्वनानि सरितो नगराणि पल्लीः
ग्रामाञ्जनानपि पशून्पथि सोऽथ पश्यन् ।



नन्वैन्द्रजालिक इवद्भुतमिन्द्रजालं
ब्रह्मैवमेव परिदर्शयतीति मेने ॥१८॥

दण्डान्वितेन धृतरागनवाम्बरेण
काशीपुरं कलितविश्रमनीलकण्ठम् ।
तेन प्रविष्टमजनिष्ट दिनावसाने
चण्डत्विषा च शिखरं चरमाचलस्य ॥१९॥

तां तारकाहितरुचिं तमसो निहन्त्रीं
तापस्य चोज्ज्वलमृगाङ्ककरां त्रियामाम् ।
काश्यामसेवत तदा किल शङ्कराख्यो
लिङ्गे शिवस्य महिते मनसा च मूर्तिम् ॥३३॥

आत्मानमेकमखिलेष्वयमद्वितीयं
पश्यन्नपि व्यवहरन्निव लोकरीत्या ।
तुष्टाव नूतनसुधातुलितैर्वचोभिः
एवं प्रयत्नकरुणाकरमिन्दुमौलिम् ॥३४॥

इत्थं कृतस्तुतिरवाप्य ततः प्रसन्नात्
त्रय्यन्तसूत्रमृदुभाष्यनिबन्धशक्तिम् ।
काशीपुरान्निरगमत्स विकासभाजः
प्रातः सरोजमुकुलादिव चञ्चरीकः ॥४५॥

अद्वैतदर्शनविदां भुवि सार्वभौमो
यात्येष इत्युडुपबिम्बसितातपत्रम् ।
अस्ताचले वहति चारु पुरःप्रकाश-
व्याजेन चामरमधादिव दिङ्मघो : ।४६॥

बिम्बे भजत्युदयमम्बुजबान्धवस्य
दध्यौ तदा पुरुषमेक ऋषिः स [illegible] यम् ।

आह श्रुतिर्भगवती किल यं हिरण्य-
श्मश्रुं हिरण्यकचमा प्रणखात्सुवर्णम् ॥५९॥

तेनान्ववर्ति महता क्वचिदुष्णशालि
शीतं क्वचित्क्वचिदृजु क्वचिदप्यरालम् ।
उत्कण्टकं क्वचिदकण्टकमल्पथाचिच्च
तद्वर्त्म मूर्खजनचित्तमिवाव्यवस्थम् ॥६०॥

आत्मानमक्रियमपव्यथमीक्षितापि
पान्थैः समं स चलितः पथि लोकरीत्या ।
आदत्फलानि मधुराण्यपिबत्पयांसि
प्रायादुपाविशदशेत तथोदतिष्ठत् ॥६१॥

तेन व्यनीयत तदा पदवी दवीय-
स्यासादितं बदरिकाश्रमभूतलं च ।
शंसन्ति यत्र वसतिं तरवो मुनीनां
शाखाभिरुज्ज्वलमृगाजिनवल्कलाभिः ॥६२॥

आदेशमेकमनुयोक्तुमयं व्यवस्यन्
प्रादेशमात्रविवरप्रतिहारभाजम् ।
तत्र स्थितेन कथितां यमिनां गणेन
गोविन्ददेशिकगुहां कुतुकी ददर्श ॥६३॥

तस्य प्रपन्नपरितोषदुहो गुहायाः
स त्रिः प्रदक्षिणपरिक्रमणं विधाय ।
द्वारं प्रति प्रणिपतञ्जगतां गुरोर्गां
तुष्टाव तुष्टहृदयस्तमपास्तशोकम् (चेत्यम्) ॥६४॥



पर्यङ्कतां भजति यः पतगेन्द्रकेतोः
पादाङ्गदत्वमथवा परमेश्वरस्य ।
तस्यैव मौलिधृतसार्णवशैलभूमेः
शेषस्य विग्रहविशेषमहं भजे त्वाम् ॥६५॥

दृष्ट्वा (पुरा) पुनर्निजसहस्रमुखीमभैषुः
अन्तेवसन्त इति तामपहाय भूयः ।
एकानेन भुवि यस्त्ववतीर्य शिष्यान्
अन्वग्रहीन्ननु स एव पतञ्जलिस्त्वम् ॥६६॥

तस्मिन्निति स्तुवति कस्त्वमिति ब्रुवन्तं
दिष्ट्या समाधिपथरुद्ध(रूढि) विसृष्टचित्तम् ।
गोविन्ददेशिकमुवाच तदा सवाग्भिः (वाग्मी)
प्राचीनपुण्यजनितात्मविबोधजिह्वैः ॥६७॥

स्वामिन्नहं न पृथिवी न जलं न तेजो
न स्पर्शनो न गगनं न च तद्गुणा वा ।
नापीन्द्रियाण्यपि तु विद्धि ततो विशिष्टो
यः केवलोऽस्ति परमः स शिवोऽहमस्मि ॥६८॥

आकर्ण्य शङ्करमुनेर्वचनं तदित्थं
अद्वैतदर्शनसमुत्थमुपात्तहर्षः ।
स प्राह शंकर स शंकर एव साक्षात्
जातस्त्वमित्यहमवैमि समाधिनेति ॥६९॥

तस्याथ दर्शितवतश्चरणौ गुहायां
द्वारेऽभ्यपूजयदुपेत्य स शङ्करार्यः ।

आचार इत्युपदिदेश स तत्त्वमस्मै
गोविन्दतापसगुरुर्गुरवे यतीनाम् ॥७०॥

गोविन्ददेशिकमुपास्य चिराय भक्त्या
तस्मिन् स्थिते निजमहिम्नि विदेहमुक्त्या ।
अद्वैतभाष्यमुपकल्प्य दिशो विजित्य
काञ्चीपुरे स्थितिमवाप स शङ्करार्यः ॥७१॥